ः॥श्रीगुरुभ्यो॥समस्तब्रह्मविद्यासंप्रदायप्रवर्त्तकाचार्येभ्योनमः॥ॐनमोभगव
तेसर्वात्मनेवासुदेवाय॥प्रणम्यरागमानिधमात्मधीपदंजगत्स्मृतिस्थितिसंयमा
यनंतदात्मकानुग्रहंकरश्चकानुगुरून्मयोपदेशार्थंविभागउच्यते॥१॥इहभगव
त्पादानिधोभगवान्नमस्कारःसर्वेषिनिषदर्थसारसंग्राहिकामुपदेशसाहस्त्री
गद्यपद्यविभागग्रंथरचनयाप्रकटीकुर्वन्नाद्योगद्यबंधमारभमाणःप्रारिप्सितप
रिसमाप्तिप्रचयगमनादिप्रयोजनंशिष्टाचारविशेषपरिज्ञानंमंगलमाचरति।अ
थेति॥ॐकारश्चाथशब्दश्चावेतौब्रह्मणःपुरा।कंठंभित्वाविनिर्यातौतस्मान्मांग।
लिकावुभाविति स्मृतावथशब्दस्यमांगलिकत्वावगमात्॥अथवाआनंतर्यार्थएवा
यमथशब्दउच्चारणमात्रेणमंगलप्रयोजनोपिभवति॥अस्यार्थंक्रियमाणमृदंगा
दिध्वनिश्रवणादिवत्।किमानंतर्यार्थंतेतिचेत्तद्विस्तरेणानेकशास्त्रार्थनिबंधनि

मित्तानंतर्यार्थंतेतिवदामः॥प्रश्नप्रतिवचनाक्षेपसमाधानप्रकारैरनेकप्रमाण
युक्तिविशेषैर्निपुणतरमवधारितेसमस्तोपनिषच्छास्त्रार्थेऽनेकवाक्यसमु
संधानव्यवधानमंतरेणसाक्षादनुनवोदयायसंग्रहेणनिरूपणप्रवृत्त्युपपत्ते
रिति।अत्रचिकीर्षितंप्रतिज्ञानानःप्रवृत्संगतयाशास्त्रीयानुबंधज्ञातंसंगृह्णाति
।मोक्षसाधनेति।अथविस्तरेणशास्त्रार्थनिरूपणानंतरं।मोक्षोनिःप्रपंचब्रह्मात्म
तावित्यवस्तुसाधनमोपनिषदाद्वितीयात्मतत्वज्ञानं।तस्मोपदेशउपदेशानसु
पदेशास्तदर्थवाक्यानामर्थविभागेनशिष्यंप्रतिप्रतिपादनं।तस्यविधिःप्रका
रविषयोपस्तंविस्पष्टमा- :ख्यास्यामः।कथयिष्यामः॥मोक्षशब्देनप्रत्यक्त्वब्र
ह्मविषयोनिर्दिष्टःसाधनशब्देनतत्वज्ञानस्मोक्त्वात्तत्साध्याज्ञानादिबंधनिवृत्तिः
प्रयोजनंसूचितं॥उपदेशविधिशब्देनसंबंधोबोध्यबोधकलक्षणःशास्त्रविषयो

दीक्षितः॥ इदानीमधिकारिणमाह। मुमुक्षूणमिति। मुमुक्षूणं मोक्षमात्रमिच्छतामि
त्यनेनैहिकामुष्मिकार्थतृष्णालेशवतामप्यनधिकारश्चितम्। श्रद्दधानानाम
स्मिन्नुपदेक्ष्यमाणशास्त्रार्थविश्वासवतामित्यनेन मुमुक्षवोपि संतोयेकर्मस्वन्यशास्त्रे
ष्वपि वा श्रद्दधते तेषामिहानधिकारः सूच्यते॥ अर्थिनामेतच्छास्त्रार्थज्ञानार्थिनामि
त्यनेन श्रद्दधानास्त्रपियेपांडित्यविस्तरश्रवणमात्रार्थास्तेषामिहानधिकारो ध्वनितः।
तथाचैवंविधानामधिकारिणामर्थयोपकाराय व्याख्यास्यामश्चत्वारः। संग्रहेण।
क्रमार्थं विवरणमिति। तदिदमिति। तदिदं मोक्षसाधनं ज्ञानं विधिवदुपसन्नायशिष्या।
यब्रूयादित्यन्वयः। तद्ग्रंथांतरेषु विस्तरेण प्रतिपादितमिदमिदानीमिहवक्ष्यमाणमि
त्यर्थः। किंतन्मोक्षसाधनं सहेतुबंधनिवृत्त्या ब्रह्मात्मावितर्कविस्मनिमित्तं यदुक्तं तदिद २
ज्ञानंवक्ष्यमाणमित्यर्थः। मोक्षसाधनपदं व्याख्यातमुपदेक्ष्यविधिपदमग्रेशिष्यावार्य

प्रश्नादिपरंपरया व्याख्यास्यन्मुमुक्षूणमित्याद्युक्तमधिकारिणं व्याचष्टे। साधनेत्या
दिना संग्रहेधिकारिबहुत्वनिर्देशः प्रदर्शनार्थोनिरुविवक्षितः॥ अतएवविवरणए
कवचनं। एकात्मवादेबहूनांनिरपेक्षाणांमुमुक्षूणमसंभवादिति॥ नाविरक्तायसंमा
न्यानिरस्तेषणायचेत्यादिशास्त्रमुपरुध्यते॥ साधनसाध्यादिति। साधनैर्दृष्टादृष्ट
र्थैःकृष्यादियागादिभिःसाध्यादैहिकादामुष्मिकाच्चनोत्पन्नाताद्दगेवानित्यादशा
श्चतात्सर्वस्माद्ब्रह्मलोकांतादपिविरक्तायविगतरागायनिवृत्तानिलापायेत्यर्थः।
कथमवगम्यतेऽयंविरक्तइत्यपेक्षायांविशेषणांतरेण विरक्तचिह्नमाह। त्यक्तेति।
अत्रैषणाशब्देनकामापरपर्यायेणतत्पुरुषाप्रवृत्तिर्लक्ष्यते तत्रपुत्रार्थादारसंग्रहेप्र
वृत्तिःपुत्रैषणा। कर्मानुष्ठानार्थमपरविद्यागमादिरूपोनयविधवित्तपरिग्रहोवि
त्तैषणा। पुत्रकर्मापरविद्यासाध्यंतल्लोकपितृलोकदेवलोकफलैषणालोकैषणाए

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

ताएषणास्त्यक्त्वायेनतेस्मो।साधनेषुप्रवृत्त्योत्सुक्यं।त्यागादेवसाधानिलाषशून्यता
गम्यतइत्यर्थः॥तथाचश्रुतिः॥नकर्मणानप्रजयाधनेनत्यागेनैकेअमृतत्वमानशुरि
ति।इदानीमेतमेवप्रव्राजिनोलोकमीप्संतःप्रव्रजंतितानिवाएतान्यवराणितपांसिभवंत
एवात्मरेचयदित्यादिशास्त्रमनुरुध्यादृप्रतिपन्नेति।परमहंसविज्ञापणंकुटीचकादि
स्मार्तसंन्यासिव्यावृत्त्यर्थं।नहिवैतानवादिनामहितीयात्मतत्वोपदेशग्रहणधि
कारइति॥नाव॥एतावतामुमुक्षूपदंव्याख्यातं॥अत्रापाश्रमधर्ममात्रनिष्ठस्याधिका
रीनास्तीतिविवक्षन्पुनर्विशिनष्टिशमदमदयादियुक्तायेति।शमोंतःकरणस्यानात्म।
विषयेभ्योव्यावृत्तिः॥दमोबाह्येंद्रियाणां॥दयाचेतश्चोदयआदिपदेनोपरतितिति
क्षासमाधानश्रद्धाःसंगृह्यंते।एतेनश्रद्दधानानामित्येतद्व्याख्यातं।अमान्यमत्सरोद
क्षोनिर्ममोदृढसौहृदः॥अमत्वरोयद्जिज्ञासुरनसूयुरमोघवागित्यादिवचनमनु

DR BHAU DAJI LAD MUSEUM

स्मृत्यपुनर्विशिनष्टिशास्त्रश्रमिणेति॥एतेनार्यिनामितिव्याख्यातं।नाशुचिर्ब्रह्मकी
र्त्तयेत्रिसंध्यादौस्नानमाचरेदित्यादिशास्त्रमाश्रित्यादृशुचयइति॥बाह्यांतरशौ
चसंपन्नायेत्यर्थः॥ब्राह्मणोनिर्विद्यमायात्एतद्धस्मैवतत्पूर्वेब्राह्मणाश्रद्दधानाविद्वां
सःप्रज्ञानकामयंतेएतंवै।तमात्मानंविदित्वाब्राह्मणइत्यादिशास्त्राणपनुस्मृत्यस्मि
ब्राह्मणेयेति॥विविदिषवोपि।क्षत्रियादयोनपारमहंस्येसंन्यासधर्मेधिक्रियंतइति
नावः॥अतएवोत्पन्नज्ञानाअपिजनकादयोनगार्हस्थ्यंपरित्यक्तवंतइतिश्रूयते।इदं
चशास्त्रंयथोक्तसंन्यासाधिकारिकमेवनोश्रमांतराधिकारिकं॥आश्रमांतरस्यप्रवृत्ति
धर्मपरत्वेनतदत्यागेनचिरुग्नैर्घृण्यनिष्ठापरत्वायोगात्॥त्यागेचाश्रमांतरत्वानुप
पत्तेः॥वक्ष्यतिचनगवान्नाप्यकारः॥अहंब्रह्मास्मिकस्मिंश्चिन्नोक्तावास्मीतियेविदुः॥
तेनष्टाज्ञानकर्मसांनास्तिकास्तुर्नसंज्ञायइति॥संन्यासिभिःपवक्तव्यंज्ञातेभ्यःश्रिष्ट

बुद्धिनेति। च। अतः पारिव्राज्यविज्ञापणं नित्याधिकारित्वख्यापनार्थं। नाश्रमांतरवत्सर्थमितिकेषांचिद्व्याख्यानं। तद्धि ज्ञानार्थंसगुरुसेवानिगद्धेत्समित्पाणिः श्रोत्रियमित्यादिश्रुतिमाश्रित्याह। विधिवदुपसन्नायेतिविद्याग्रहणार्थंगुरुपादग्रहणपूर्वकमधीहिनगवइत्यादिमंत्रोद्धारणेनानिसंवादनमुपसत्तिस्तांकृतवतइत्यर्थः। शिष्यायशासतोहयिदंवश्रुतत्वादिनिमित्तोद्यत्परिहितायविनयमुक्तोयत्पर्यः। किंगोत्रोनुसोम्यासितं [illegible]मृषिरुवाचतृयएवतपसाश्रद्धयाब्रह्मचर्येणसंवत्सरंसंवत्सरवासिनेवसूयादित्यादिश्रोतलिंगमवष्टभ्याहज्ञातिकामित्यादिनाज्ञातिपरीक्षणंकुंडगोलकस्त्रियादिभ्याहृत्पर्यंतकर्मपरीक्षणंपतितत्वानिग्रास्तत्वादिराहित्येनशिष्टताज्ञानायाहतत्रमाचारः शीलंवातत्परीक्षणंविद्याग्रहणंत्रैरकालमपितत्परिपालनयोग्यताज्ञानार्थंविद्याहृर्वाधीतवेदशास्त्रादिरूप

ध

PAGE(S) MISSING
NOT AVAILABLE

FOLIO NO. 4 & 5 MISSING
(II) (I)

द्योतनार्थः
२

एतदानस्मेदमनुरूपमितिभावः। तथाचश्रुतिः॥पादोस्यविश्वाभूतानित्रिपादस्या
मृतंदिवीति। तदेवमाचार्येणपरीक्षितायशिष्यायकृपयैवविद्यावक्तव्येत्युक्तंतत्र।
किमाचार्योपगमेननकार्यस्वयमेवजिज्ञासोर्न्यायाद्यनुसरणतोविद्योदयसंभवादि
तिरोकायमाहाम्येति। यद्वाकिमित्येवंसंकटंमवेत्याचार्येणविद्यादेयाशिष्यः स्व
यमेवतांकिंनसेपादयेदित्यतआहाम्यथावेति। तत्रश्रुतिस्मृतीप्रमाणयति। आचार्य
वानित्यादिता। आचार्यइवविद्याविदितासाधिष्ठंप्रापयतीतिवाक्यशेषः। आदिपदा
न्नधिधिप्रणिपातेनपरिप्रश्नेनसेवया। उपदेक्ष्यंतितेज्ञानंज्ञानिनस्तत्त्वदर्शिनइत्या
दिवचनंगृह्यते। तथावातिसूक्ष्मपरमार्थनिर्णयेस्वबुद्धिसामर्थ्यमात्रेणासं
पादयितुमशक्यत्वमेतावत्कैर्गम्यतइत्यर्थः। ननुजिज्ञासोरुक्तविशेषणस्यशिष्य
स्यकथंउपदेशग्रहणादेवविद्यादाढ्योपपत्तेः। किमितिपुनः पुनरुपदेशाःकार्यइ

सुक्तमतआह।शिष्यस्येति।शिष्यप्येति।शिष्यमज्ञानाग्रहणंचकारात्विपर्ययग्रह।
णंचमुखादिचेष्टावचनव्यक्त्यादिलिंगैर्बुध्याग्रहणादिहेतुत्वेनोपन्यस्तानि
वर्त्तकैःश्रुतिस्मृतिविहितैरपनयेदितिसंबंधः।तानेवाहाधर्मेत्यादिनाअधर्मः सं।
चितः।लौकिकइदानींतनःक्रमादेकप्रचारवादनग्रहणादिः।।तत्रस्मृत्यादिदेवतो
पासनादिनियमोपदेशोनोधर्मग्रहणकारणंयःवर्त्मविर्त्यादियतिधर्मज्ञास्त्रेणप्र
मादनिरासः।नित्यानित्यविवेकस्यायोविषयश्चेतनाचेतनस्वरूपस्तस्मिन्नसंज्ञानंतन्मूर्ख
तंनयस्तंयहदृष्टश्रुतत्वंतत्युक्तिविशेषाद्युपन्यासेनापनीयविवेकपर्यंततान
यिदित्यर्थः।लोकचिंतावेत्रणंलोकानांव्यवहारसाधुत्वासाधुत्वविचारणं।लोकेस्वः
जातसन्मानाद्यपेक्षयातत्संसर्गपरोधेनवहरणंवा।एतच्चवक्ष्यमाणंमानित्वमदं
भित्वमित्यादिशास्त्रोक्तनिष्ठोपदेशेनापनेतव्यं।।जातादीत्यादिपदात्कुलविद्यादिगृ

ह्यतेत्वंपदार्थपरिशोधनोपदेशेनजात्याद्यभिमानंत्याजयेदित्यर्थः।अभिमानादि
नित्यादिपदेनतत्प्रयुक्तोमदहारोन्मधिक्कारणादिर्गृह्यते।अक्रोधादिनिरित्यत्रा
दिपदेनाकामादयोगृह्यंते।।अहिंसादिनिश्चेत्यादिपदात्सत्यास्तेयब्रह्मचर्यापरिग्र
हागृह्यंते।अत्राक्रोधादीनामहिंसादीनामुपायोपेयभावेनोपदेशोवोद्यमः।शौचसं
तोषतपःस्वाध्यायेश्वरप्रणिधानानिनियमाउच्यंते।तिपांचज्ञानाविरुद्धेरितिविशे
षणेनतीर्थयात्राचांद्रायणोपवासादिकर्मकांडपरायणवाह्यसाधनक्रियाव्यव
च्छेश्वरप्रज्ञानिष्ठादिचयत्प्रज्ञाननिष्ठाविक्षेपकरंतस्यानादरणीयतांदर्शयतिय
मनियमोपदेशरूपसर्वदोषनिराससाधारणोपायइतिद्रष्टव्यं।एवज्ञानग्रहणप्र
तिबंधकनिवर्त्तकमुपदिश्यज्ञानोदयहेतुजातमुपदिशति।अमानित्वादिगुणमिति
।आदिपदाद्दंभित्वादितत्वज्ञानार्थदर्शनंतंगृह्यते।।यद्यप्यमानित्वेनादंभित्वादि

कंसहपवितत्वेनोपलक्षादिपदेनोद्दिष्टासर्वतृतानामित्यादिनोक्तंश्रद्दधात्वादयाधर्मा
ख्याः। अत्रसम्यक्पदमेतन्निष्टस्यसर्वदोषपरिहारेणयत्नसंज्ञानदार्ढ्यमिति
दर्शयितुं। अयंनावःनहिसङ्ग्रहणमात्राद्विद्यादृढोत्पद्यते। आवृत्तिरसङ्कृदुपदे
शादितिन्यायात्। श्रवणोत्तरकालंमननादिविधानसामर्थ्यच्चिदृढत्वंहिफलपर्यंत
त्वंविद्याविवक्षितं। अतःफलानुकूलतयायावन्निर्विचिकित्संतत्संजायतेतावद्यु
क्तिशिष्यंक्षतार्थकंत्रिवृत्तेर्विद्योपयोगार्थंवाप्रवृत्तेनोपदेशः कार्यइतिचेन्नो
एवमाचार्यङ्कृत्यमुत्कीर्तयन्लक्षणमाह। आचार्यस्त्विति एतद्धतत्त्वजिज्ञासुनाधि।
कारिणाएवंविधआचार्योपगंतव्यानान्यादृशइतिदर्शयितुं। नत्वाचार्यएवंविध
गुणेननवितव्यमितिनियोगःक्रियते। तस्मात्कृतार्थत्वादितिदृष्ट्वाशिष्येणानुक्र
म्यापूर्वमूहःउपदेशाममंमयंशिष्यप्रतिपत्त्यनुकूलाकृत्वायुक्तिकल्पनंवा॥

शिष्यस्यमिथ्याग्रहणपरिहारसामर्थ्यमुपोद्घातप्रतिपक्षनिराकरणसाम
र्थ्यंवा। शिष्यक्षतप्रश्नाक्षेपवाक्यार्थनिर्णयद्यावधारणसामर्थ्यंग्रहणं। गृहीतानांते
षांसाराभावधारणपूर्वकंप्रत्यक्षक्रियासमर्थसमर्थनयोग्यतापादनंधारणं॥ शमद।
मोरत्यागोनो। दयादुःखिनंप्रत्यनुज्जिघृक्षा। तदनंतरंदुःखिनोदुःखापाकरणेप्रवृ
त्तिरनुग्रहः। आदिशब्दादुपसन्नस्यविनीतस्यानुगृहीतस्यापरित्यागोगृह्यते। यस्तु
हिंसानुग्रहयोरनारंभीतिगोतमेनसंन्यासिधर्मेदर्शितोयच्चनव्याख्यानपरायतिरि
त्यादिवचनंतत्रज्ञातिज्ञानदृष्टादिहेतुप्रवृत्तिविषयमित्यदोषः। संपन्न
इतिदृष्टेक्तिगुणेगद्यतोच्यते। लब्धागमःस्वगुरुभ्यःप्राप्तविद्योपदेशः। अनेनविद्योप
एगनगुरोःसांप्रदायिकत्वमपिशिष्येणान्वेषणीयमितिसूचयति। दृष्टानांगाणेहिका।
अदृष्टाःपारलौकिकास्तत्साधनलोकाराधनतेषांयज्ञादिप्रवृत्तिरुत्पद्य

त्यर्थः। यतस्त्यक्तानिसर्वकर्माणिसाधनानिधनदारसंग्रहशिखायज्ञोपवीतादीनियेन
सतथा। अतोनोगानामक्रऽतिविदितऽत्यर्थः। ब्रह्मविन्महावाक्यार्थप्रत्यगात्मतत्व
ज्ञानवानित्यर्थः। तत्किंपरोक्षतयेवनेत्याह। ब्रह्मणिस्थितऽति। ब्रह्मणिस्थितिर्नाम।
नित्यापरोक्षंब्रह्मैवाहमस्मीतिस्फुटानुभवेनावस्थानं। एवंविधोपिनयथेष्टचेष्टावा।
नित्याहानिर्लष्टऽति। नन्विनोनो। ह्रेषिंतंदृष्टमाचारोयेनमतथा। शिष्टविगर्हितो
ननवतीत्यर्थः। हंनोधर्मध्वजित्वेआत्मनोलोकेधार्मिकत्वख्यापनमितियावत्। कुह
कंपरप्रतारणं। ज्ञाद्यंनेष्टुर्यामायापरव्यामोहनंमात्सर्यंगुणेषुदोषख्यापनं। अनृतं
मिथ्यानापणं। अहंकारोदेहात्मिमानः। ममत्वंपुत्रशिष्यादिपुरस्त्वात्मिमानः एते दंभा
दिनिदोषावर्जितऽत्यर्थः। एवंविधस्यकिमित्यन्योपदेशोप्रवृत्तिरित्यतत्राह। केवलेति।
परस्मसंसारसागरान्निर्विण्णस्यः परमपदपारप्रापणैकोपानुग्रहस्तदेवप्रयोजनंयस्य

सतथा। केवलविज्ञप्तेनानुषंगिकमपिप्रयोजनांतरंप्रवृत्तिर्दुर्वारयंती। तर्हिकिं
निर्निमित्तमेवपरानुग्रहेप्रवर्तनमुन्मत्तप्रवृत्तिवद्यादृच्छिकीनेत्याह। विद्योपयोगा
र्थीतिउपयोगोविनियोगः। वाक्यालेकृत्स्नविषाणंग्रासमृतीत्यादिवत्। त्यजधर्ममिधर्मं
चउन्नसत्यानृतेत्यज। उन्नेसत्यानृतेत्यस्कायेनत्यजसितत्त्यन्नेत्यत्रयेनज्ञानेनधर्मा
दिप्रवृत्तिनिरोधेनतानिपरित्यजसितज्ञानंत्यजेत्कस्यज्ञानस्यामूर्तत्वात्स्वरूपेण
त्यागायोगाद्विशिष्टशिष्येप्रतिपादनंप्रतिपत्तिकर्मक्रियते। तच्चवस्तुमहिम्नापरान्
ग्रहतांप्रतिपद्यतऽतिनावः। एवंविधस्याचार्यः पूर्वमुपदिशेदित्यपेक्षायामेकत्वप्रतिपादकवाक्यात्पूर्वमुपदिशेदितिवाक्या
त्प्रथमंकिमुपदिशेदित्यपेक्षायामेकत्वप्रतिपादकवाक्यात्पूर्वमुपदिशेदितिसंब
न्धिपदनिमंदेवेत्यादिना। इत्यात्मैकत्वप्रतिपादनपराश्रुतीः पूर्वमुपदिशेदितिसंब
धः। यत्रनान्यत्पश्यतीत्यत्रनान्यच्छृणोतिनान्यद्विजानातिसभूमितिवाक्यशेषः। त्र

सेवेदंविश्वमिदंवरिष्ठमितिशेषः।अत्रसङ्घातात्मब्रह्मज्ञाद्दाःपर्यायाः।अनेकग
खादिगुणवाक्योदाहरणंगतिसामान्यादितिन्यायेनाविशेषतःस्वार्थंपरत्वस्यापि
नार्थंकिंतुब्रह्मादिज्ञापैर्वस्तूच्यते।कथंचतदद्वितीयमवगम्यतइत्यपेक्षायामाह।
उपदिश्यवग्राह्येब्रह्मोपलक्षणमितिशेषोज्ञानायापिपारिशेष्यंमोहंजगन्मृत्फलमत्ये।
तीतिशेषःज्ञानंदमनंतमित्फलनयत्रब्रह्मेतिवाक्यशेषः।एवंसर्वत्रवाक्येऽशेषाज्ञग
ल्लक्षणपरित्वयेनष्टरलीपानियानिग्रंथनृत्यस्थानमर्वत्रपदश्रुतेः।यत्रात्मापस्व
तपाप्माऽत्यादिप्राज्ञापत्यवाक्येनज्ञाग्रद्दाद्यवस्थासुदृष्टत्वेनानुगतावस्थाधर्मरहि
तोऽशरीरःप्रियाप्रियाभ्यामसंस्पृष्टःवत्सगात्मेवपरंज्योतिःपरंब्रह्मोपासंज्ञेयंचेतिव
करणायेपिन्यासेनब्रह्मैक्यमुपलक्षयेदित्यर्थः।सर्वंतिरोहृष्टबुधिवृत्तिलक्षणा
याऽष्टाप्राणनादिव्यापारोपलक्षितःसएवाज्ञानायादिप्राणंतःकरणशरीरधर्मति

C. BHAU DAJI

तःसाक्षाद्परोक्षाद्ब्रह्मेतिद्वितीयवाक्यार्थः।।नेतिनेत्यादिवाक्यानांमकलदृश्यप्रवि
लापनेनाद्वितीयात्मत्वोपलक्षणपरत्वं।अदृष्टंद्रष्टृश्रुत्यादिनानात्वदृष्टोस्तिद्रष्टृश्रुत्या
दिवाक्यैःसहसर्वसाक्षिब्रह्मगात्मेवाक्षरंयस्मिन्नाश्रुताकाशादिधरित्यंतंजगदोतं
चप्रोतंचेत्फपलक्षितंतत्वमित्यर्थः।विज्ञानमानंदंब्रह्मेतिकोचेन्नजनयेत्पुनःमर्त्यःश्रि
मृत्फनाद्दक्कुःकस्मान्मूलात्प्ररोहतीतिदृष्टस्यजगन्मूलकारणत्वेनोपलक्षितस्यस्व
रूपंविज्ञानानंदलक्षणमितितत्पदार्थतत्वमुपलक्षितमित्यर्थः।एवंब्रह्मविदाप्नोति
परमितिब्रह्मतत्पदार्थःसंज्ञानमनंतमितिस्वरूपंनिर्दिश्यतस्माद्वाएतस्मादा
त्मनआकाशःसंभूतइत्यादिनाजगत्कारणत्वेनोपलक्ष्यतेसेवमृष्टेषुकार्यकारण
संघातेषुप्रवेशंदर्शयित्वाब्रह्मैवेदंसर्वमात्मेत्यनिरुक्तेइत्यादिनाप्रपंचापवादेनसर्व
धारंसर्वसाक्षिणमात्मानमानंदरूपंब्रह्मोच्छंप्रतिष्ठेतिश्रयसोनयंगतोभवति स

यश्चायंपुरुषेयश्चासावादित्येसएकइतिचैतत्वमुपलक्षयेदित्यर्थः।सवाएषमहानज
आत्मायोयंविज्ञानमयःप्राणेष्वयएषोंतर्हृदयेआकाशस्तस्मिंछेतेसर्वस्यवशी
त्यादिनाजाग्रदाद्यवस्थाधर्मैरनाद्यागतसंसारस्यकामोकामास्यांसंसारमोक्षावनु
भवतोबुध्यादिसाक्षिणश्चिदात्मनोंतर्हृदयेआकाशशब्दवाच्याज्जरामरणाद्यादिलक्ष
णब्रह्मात्मनेदंतितत्वमुपलक्षितमित्यर्थः।दिव्योह्यमूर्त्तःपुरुषःसबाह्याभ्यंतरोह्यजः।
अप्राणोह्यमनाःशुभ्रोह्यक्षरात्परतःपरइतिश्रुत्यपरायणयातदक्षरमधिगम्यतेयत्तद्रू
पमित्यादिनाग्राह्यग्राहकाद्यनेकोपाधिप्रतिषेधेनोपलक्षितस्यसर्वभूतयोनित्वन
वमंनाविदस्यसर्वज्ञस्यसर्वविदोग्निविस्फुलिंगादिवज्जीवरूपेणविनिष्क्रम्यावाग्म
परिच्छेदशंकानिराकरणेनप्रत्यक्त्वमुपलक्षितंब्रह्मैवेदंविश्वमिदंवरिष्ठमित्यंते
नित्यर्थः।इदंसर्वंयदयमात्मेति।सर्वज्ञस्यसर्वविदोग्नि[illegible]विस्फुलिंगादिवज्जीवरूपेणवि

१०

स्मरूपस्यात्मव्यतिरेकेणस्वरूपानावमुक्तंइंडत्यादिदृष्टांतैरुपपाद्यकिंतदात्मनः
स्वरूपमित्यपेक्षायांसद्घृतमनंतमपारंविज्ञानघनएवेतितत्वमुपदिष्टमित्यर्थःतदे
तद्ब्रह्मात्मैवमनपरमनंतरमबाह्यमयमात्माब्रह्मसर्वानुभूरितितत्वंपदार्थपरिशोधन
द्वारकंवाक्यार्थेदृष्टिः।तत्रात्मेत्यादिनाकार्यकारणत्वादिधर्मरहितत्वेनतत्पदा
र्थउपलक्षितः।सर्वानुभूरितिसर्वसाक्षितयात्वंपदार्थः।अयमात्माब्रह्मेतिवाक्यार्थइ
तिविभागः।मनःप्राणादिपुरुषकाशकत्वेनप्रेरकत्वेनचोपलक्षितमात्मतत्वंब्रह्मविदि
तावेदितास्यांकार्यकारणाभ्यामन्यदितितत्स्वरूपंनिवेद्यतेऽनेदंवतद्विदितादध्योवि
दितादधीत्यनेनेत्यर्थः।कचिदाकाशशब्देनापिब्रह्मलक्ष्यतेऽस्माद्।आकाशोवैनामति
।नामरूपयोर्निर्गृहीतृतयोरव्याकृतयोर्यानिर्वहितातेयाकृतिनामरूपेचयदंतरा
यस्मिन्नेवंविधेनेनतः।अथकृत्स्नंत्रैतद्ब्रह्मनदृष्टंसआत्मेतिवाक्यशेषादृष्टेरस्मिन्न

तरा काशइत्यत्रा काशाग्रहेनापिब्रह्मलक्ष्यतइत्यर्थः।आदिपदात्प्राणोस्मिप्रज्ञात्मा
प्राणइतिहोवाचेत्याद्याःश्रुतयोगृह्यंते।नकेवलंश्रुतिर्निरवब्रह्मोपलक्षणंग्राह्य
दपितुस्मृतिर्निश्चेत्साहस्मृतिर्निश्चेति।श्रुत्यैकलक्षणविरुद्धानिरितिस्मृतिर्विशे
षणं।श्रुत्यैकेर्थस्मृत्यैकदाहरणंप्रतिपत्तिदार्ढ्यार्थंनश्रुतेःप्रामाण्यमिष्टार्थविशेषा
णंचसांख्यादिस्मृतिप्रसंगव्यावृत्यर्थमितिचद्रष्टव्यं।परमात्मासंसारित्वप्रतिपादनपरा
निरित्यादिविशेषणद्वयंश्रुतिस्मृत्योःसाधारणंपरमाश्चासावात्माचपरमात्मापरमत्व
चास्याविद्यातत्कार्यसंघाततदवस्थासाक्षितया।अनिवार्यत्वुप्रकाशस्वभावत्वं।तस्मा
संसारित्वप्रतिपादनंसंघाततदवस्थात्रयोपाधेःसम्यग्विवेचनंतत्परानिरित्यर्थः।तस्य
धितस्मत्वंपदार्थस्यमर्वेणसर्वमस्मिन्निति सर्वंसर्वाधिष्ठानंब्रह्मातेनाभेदेत्वंतदेकात्म
त्वंतत्प्रतिपादनपरानिरित्यर्थः।न्यायानुगृहीतानिश्चेत्यस्मिन्नर्थेचकारः।एवंवाक्योप

दिष्टोनतदर्थपिलक्षणपरश्रुतिस्मृतिव्याख्यानेनवप्रतिबोधितंशिष्यमज्ञानमंशा
यविपर्ययापोहेनापरिदृष्टार्थमतिर्निश्चलायपुनःटङ्कदाचार्यइत्याचार्यइत्यमाह।एव
श्रुतिस्मृतिनिश्चेति।तथाचशिष्यप्रतिपत्तिपरीक्षणार्थाश्रुतिर्नवेतियदिमन्यसेमु।
वेदति।वदरमेवापिनूनंत्वंवेत्थब्रह्मलक्षणरूपमित्याद्या।हेमाप्रियदर्शनिकस्त्वंकिमात्म
कश्चितगुरुणाष्टष्टोयदिमशिष्यांप्रतिपत्त्यादिदोषप्रतिबंधवशाद्भूयाद्ब्राह्मणउत्रइत्या
दितदाआचार्योब्रूयादितिसंबंधः।अस्मावन्यायावंशायसमीहमदीन्वयःअमुकदीक्षि
तवंशोहमित्यर्थः।महाग्राहोनक्रस्तिमिंगिलोवा।अहोयमद्योपिदहानिमानप्रतिबंध
ज्ञानोदयइतितंसाज्ञयत्याचार्यईहेवनइत्यादिना।वयोनिंपक्षिनिर्गंधादिनिरित्यर्थः।
एवंस्थूलदेहाभिमानेत्याज्ञितेततोविविक्तमात्मानंमन्यमानःसंन्यस्यदिशिष्योब्रूयाद
सोहंशरीरादित्यादितदाइत्याचार्योब्रूयादित्यत्रकारेणान्वयः।कथंशरीरादन्यत्वमव

गतमित्यत आह। शरीरं जायत इत्यादिना। शरीरावस्थाऽदृष्ट्वा दृश्यविकारिणोऽहं द्रष्टा
विकार्यस्य इत्यर्थः। कथं तर्हि देहादस्मत्ववदेहाभिमानपूर्वको व्यवहार इति चेदविद्या
प्रयुक्तकामप्रवृत्तिधर्माधर्मविज्ञानादिसाहतस्मिन्नहमिति। स्वच्छतविज्ञोपणेनाहंकारपूर्वक
त्वद्योतनादहंकारस्य चाविद्यां विनाकेवलेऽात्मन्यसंभवादविद्याप्रयुक्ताभिमानमूल
त्वधर्माधर्मयोरितिभावः। यद्येवं ज्ञानाभिमानहिकर्मकाप्यीरितिचेत्सर्वेहतकर्मवासना
परवशतयोत्तरोत्तरकर्मप्रवृत्तेर्न्नशक्योमहंनिरोद्धुमित्यनिष्टेत्याहएवमेवाहमनाद्यवि
द्यानिष्क्रियमाणैःकालनद्याक्वचित्तरतिकश्चनेत्यादिन्यायेनाहक्रमेणेदंशरीरमासाद्येति।
एवंनांकर्मणांसंचितत्वेपिक्रमेणैवफलारंभोनयुगपदितिकेनविकत्ववादःक्रमशोहन
निरस्तेः। एतेननित्यानित्यविवेकआत्मनोज्ञातइतिफलितमाह। तस्मान्नित्यएवेति॥
आचार्यस्तुविवेकाक्रिंप्रयोजनमत्रस्यनुज्ञानातिसाध्वादीरिति। एवंविवेकवतस्तत्त्ववर्णी

यमाद्यनिमानोन्नतिमूलएवेत्याहकथंमृषावादीरिति। कथंन्वोतिर्ममेतिप्रष्टवंतमा
चार्यब्रूयादित्याह। तमितिकिंब्रूयादित्यतदाहयतस्त्वमित्यादिना। जातिजन्मन्वयःपि
त्रादिसंस्कारोज्ञातकर्मादिउपनयोदिश्यतेनात्रनात्मनृताज्ञातन्वयसंस्काराभावसंशरी
रस्यतत्रथाज्ञातन्वयसंस्कारवर्जितस्यात्मनःकूटस्थस्यस्वरूपमिवाहमित्यहंत्रिरवच्छा
रीरंप्रतिज्ञातवान्। ब्राह्मणपुत्रइत्यादिनावाक्येनातोविपर्ययदर्शित्वान्मृषावादीरित्यर्थः
॥उक्तमर्थंविशदीकर्तुंशिष्यप्रश्नमुत्थापयतिनयदीति। गुरुमन्त्रदानायप्रवृत्तिमाहाचा
र्यइति। वक्तव्यमार्थमातिसूक्ष्मदृष्टिगम्यत्वान्नावधानेनवेत्याहश्रुणोम्यति। यद्यदमिदं
दिवर्जितइत्यंतंशिष्योक्त्यनुवादवाक्यमुक्तांतंशिष्यंप्रवक्तिंपरमात्मलक्षणंस्मारयदि
तियोजना। यस्मात्सदेवेत्यादिश्रुतिर्निस्तदर्थानुकूलानिःस्मृतिर्निश्चयोयाक्तलक्षणंप
रमात्मानंमत्वात्मानंत्रातोमितस्मात्त्वमर्हसिसोम्यति। योजनायोग्यथःपश्चात्मापं

हतपाप्मेत्यादिनिःश्रुतिनिर्ज्ञायतइत्यादिस्मृतिनिश्चइवक्रंब्रह्मापलक्षणंवत
स्मात्मनःस्मर्तुमर्हसीत्यन्वयः।एवमुक्तंस्वरूपंस्मारयित्वाशरीरमनिन्द्रियमनःप्राणादिरहितमित्यन्वयसंस्का
रत्वज्ञापनायतदुत्पत्तिप्रकारमुपदिशेदित्याह।तद्ब्रह्मपरमात्मेति।तद्ब्रह्मापरमात्मनःलक्षण
विषयास्मृतिरनुसंधानंयेनतस्मैशिष्यायब्रूयादित्यर्थःउपलक्षणत्वेनोक्तवाक्यार्थमिव
प्रकटयन्नात्मनःसकाशात्संघातोत्पत्तिप्रकारमाहयोसावित्यादिना।यःशरीरांतरप्र
करणांतरवात्मादिशब्दैःप्रसिद्धोऽसावाकाशोवेनामनामरूपयोर्निर्वहितातेयदंतरस
त्तद्ब्रह्मोक्तमपिनिर्दिष्टआकाशनामास्वात्मविलक्षणोयोव्याकर्त्तासर्वस्मात्मत्यन्वयः।आका
शोनामतत्कर्तृताकाशशब्दोकाशात्मानमाकाशयतीतिरत्वादिव्युत्पादनादितिन्यायेनपरिहरति
।नामरूपाभ्यांव्यतिरिक्ततइतिकृताकाशसनामरूपांतःपतित्वात्तयोर्धारयृतआत्मा।
आधेयाद्धाकाशादिरभूदित्यर्थः।असंगत्वादिनिराकाशसात्मात्परमात्माप्याकाशशब्दे

नश्रुतिशुक्लाचिन्निर्दिश्यतेगोणावृत्त्येतिद्रष्टव्यं।अतएवाशरीरोमूर्त्तिविवर्जितःअशरी
रपदमनिंद्रियत्वादेरप्युपलक्षणमित्यनिंद्रियत्वविशिष्टस्थूलादिलक्षणइति।अथवा
शरीरःशरीरादिसंघातरहितइत्यत्रप्रमाणंसूचयत्यस्थूलादिलक्षणइति।यतःशरी
रेंद्रियमनःप्राणादिरहितोतएवापहतपाप्मादिलक्षणोनिमन्यमानस्यानावेऽनिमा
नावादित्यर्थः।चशब्देनस्वतोविकारराहित्यंसमुच्चीयतेसर्वेविशेषणैःसिद्धमर्थमाह
सर्वैरितिअनागंधितोऽसंस्पृष्टइत्यर्थः।नन्वेवंपरमात्मनोशरीरादिलक्षणत्वेपिजीवःशरीरा
दिलक्षणएवस्यादित्याशंक्यतमेतंनानन्यत्वश्रवणान्नैवमित्यनिंद्रियमनःप्राणादित्या
दिना।विज्ञातंतत्कर्तृप्राप्तंविज्ञानकर्तृत्ववास्यात्तिनित्यविज्ञानस्वरूपइतिनत्रप्रमाणमा
ज्ञानंतरइत्यादिनाआकाशवत्परिशेषाद्भवत्यन्वयः।शुणईतिनिष्टावत्सयोनकर्मणाकिंतु
कर्त्तरिपरिच्छेदान्नावद्योतीत्याकाशदृष्टांतः।कथमवंलक्षणमसद्दृष्ट्वादिकमुक्तमित्य

तत्राहानंतशक्तिरिति। इंद्रोमायाभिः पुरुरूपईयतइतिश्रुतेरनंताश्चनवच्छिन्नाऽनंतरूपा।
मायावस्थारूपाःशक्तयउपाधयोयस्मिन्ननंतशक्तिः मायाकार्यंतिःकरणेंद्रियोपाधिभि
र्दृष्ट्वादिमपदेशनाग्रवतीत्यर्थः सर्वस्मिन्स्थावरजंगमरूपसप्रपंचस्यात्मास्वरूपमित्या
र्थः। तस्मिन्नित्यमसंसारित्वंस्वाभाविकमाहाज्ञानायादीति। अविनवितिरोभावसाक्षित्वा
दिवतद्धर्मिति इत्यर्थः। एवमात्मस्वभावमुक्तानामरूपात्मकानात्मस्वभावंप्रपंचयति। स्व
त्मविलक्षणयोरित्यादिना। अचेतनयोरित्यर्थः। जगद्बीजकृतयोरिति। उपादानत्वमु
क्तेकथंतद्यर्तिमोपादानत्वश्रुतिरित्यताहस्वात्मन्ययोरिति। उपादानाधारतामा
त्रेणकथमुपादानत्वसिद्धिरित्यताह। सज्ञावमात्रेणेति। सज्ञावोनामसत्वंआत्मसत्ता
मात्रेणेवात्मनिस्थितयोर्नष्टयकस्तोरात्मनिष्टयोरित्यर्थः। तथाचस्वात्मैकतागतयो
र्नामरूपयोर्व्यकिर्त्तस्वात्मनेवमाकर्त्तृत्वंपादानत्वसिद्धिरात्मनइत्यनिःप्रायः। कुतए

DR. BHAU DAJI
डाक्टर भाऊदाजीहस्तस्थमस्तकम्

वंचिद्रूपस्यात्मनोऽचिद्रूपेणस्वात्मव्याकरणमित्यतआहाचिंत्यशक्तित्वादिति। अया
ऽतयोरनानिव्यक्तयोरित्यर्थः। अननिव्यक्ततयास्थितंहिव्यक्तीक्रियतेनचार्गसदृति
प्रसंगादितिभावः। उक्तलक्षणयोर्नामरूपयोर्यदामोनिष्पादयितातदाकिमात्मकेते
प्रथमंनिष्पाद्येतेऽतितदाहतेनामरूपेऽत्यादिना। तस्मादपहतपाप्मत्वादिलक्षणाद्
तस्मादचिंत्यशक्तेःसर्वज्ञादाकाशइतिनामवाचकःशब्दःआहतिर्व्याकारऽतेवमाकाश
रसंदृत्तेएवंव्यवहारयोग्येऽव्यृतामितिर्थः। वाच्यवाचकाकारेणसदात्मकब्रह्मेवमायावा
शादनिव्यक्तमाकाशादिशब्दार्थात्मकमितितात्पर्यार्थः। ननुकथंचिदात्मनोऽचिदात्म
काकाशात्मनानिष्पत्तिरितिशंकांदृष्टांतेनप्रत्याचष्टेतथाकाशाद्यमित्यादिना। दृष्टांत
विहएवन्नात्मनःपरिणामित्वशंकांवारयति। नसलिलमित्यादिनासलिलव्यतिरेकेण
स्वरूपतःप्रथगनुपलंभादित्यर्थः। फेनम्यसलिलोद्भवानांवसलिलस्यापितानेना

MUMBAI

दृश्यतत्राहुर्मा जलंत्विति। अतोनमलिजमेवफेनंनापितोन्नेकिंत्वनिर्वचनीय
मित्यर्थः। तथाचश्रुतिः॥ वाचारंभणंविकारोनामधेयंइति। दार्ष्टांतिकमाह। एवंप
रमात्मेति। निरूपितोमाकाशोत्पत्तिंनिगमयतितेनामरूपेइति। इदानींततोवायो।
र्युत्पत्तिंप्रतिपादयति। ततोपीत्यादिना। आकाशात्मनास्थितेनामरूपतदनुगते।
नात्मनाव्याक्रियमाणेततोप्याकाशादपिस्थूलनावमापद्यमानसतीवायुनावमा
पद्येतेइतियोजना। स्थूलनावःस्पर्शगुणोपचयःयेनामरूपआकाशात्मतांप्राप्ते
नैवव्याक्रियमाणेवायुनावमापद्येतेइतिवदविकारस्यविकारांतरोपादानत्वंवारय
ति। एवमुत्तरत्रापिद्रष्टव्यं। तेवैदृतोस्त्रिमुत्कातेयःसंघातस्थूलसोस्त्रिप्रकार
माहा दृथिव्याश्चेति। पंचात्मकाइतिपंचीकृतपंचभूतानिवर्तंतइत्यर्थः। तद्यत्रयंस्त्रि
योलोहितंपुंसःशुक्लंतच्चेतत्यर्थः। कामएवमन्युरजोविलोडकोमंथास्तेननिर्मथनोद्भू

तमित्यर्थः। एवंगर्भेहिंसनीवालिंगर्भेहिंसरस्वतीत्यादिगर्भाधानमंत्रैःसंस्कृ
तमित्यर्थः। एवंशरीरोत्पत्तिमुपोद्घातयोपदिश्यतत्संनिधानज्ञात्मत्वयसंस्कारंप्रष्टु
प्रतिपादयति। तज्ञातमित्यादिना। ज्ञातमित्यस्यआख्यालक्षणमाह्रतिकमितिभूतो
पादानकत्वेनपित्रादिनिमित्तकत्वेनचनिरूपज्ञात्मत्वयोशरीरस्योक्तोइदानींसंस्कार
माह। ज्ञातकर्मादिनिरिति। एवंस्थूलशरीरात्रिर्मानात्रिष्पंमुंडाप्यसूक्ष्मशरीरानि
मानमपितस्यात्राजयंस्तस्मात्पिनोतिकत्वमाह। मनश्चेत्यादिना। नामरूपकार्ण्यवेनोति
कान्येवेत्यर्थः। तत्रप्रमाणमाह्रअन्नमयमितिश्रुतोमनआदिसूक्ष्मसंघातोपिनात्मा।
नोतिकत्वात्स्थूलवदित्यर्थः। कथंनिरूपज्ञात्मत्वयसंस्कारंशरीरमित्यस्यप्रश्नस्योत्तरमा।
निधायकथंवाहंज्ञात्मत्वयसंस्कारवर्ज्जितइतिश्रिष्याक्षिप्तंद्योत्तरमाहकथंवेत्यादि
ना। यस्तुनामरूपविलक्षणःस्वेक्तिविशेषणोनामरूपात्मकप्रपंचस्यद्रष्टाज्ञात्मत्वयसं।

स्कारवर्जितः इतिशब्दोऽतिरिक्तोत्तरमाह कर्मवेत्यादिना। यत्तु नानारूपविज्ञाण
र्वेति विशेषणं [illegible] पालकल्पितर्वस्तुनष्टाज्ञात्यन्तव्यं [illegible] सेएवा
विक्षतः सृष्टेषुकार्यकरणसंघातेषुप्रविष्टोजीवात्मेतिश्रुतिस्मृतिभ्यांसिद्धत्वान्नत
स ज्ञात्यन्तयसंस्कारसंबंधइतिप्रतिपादयन्नाहयोसावित्यादिना। ननुपरमात्मैववे
दृष्टप्रविष्टःपक्षीवनीडंतर्हिकथंसमेवैन्नोपलभ्यतइतितत्राहाम्पेरदृष्टइति अदृष्टो
दृष्टेत्यादिश्रुतिरिहार्थतोदर्शितामर्वस्योविज्ञातासमवविनासकत्वान्नान्येरवभा
स्तेसोस्मेवेहप्रविष्टइतिभावः॥ अत्रमंत्रमुदाहरति। सर्वाणीति। रूपाणिशरीराणिवि
चित्यविरचय्य धीरोधीमान्सर्वज्ञस्तत्र प्रविश्यनामा [illegible] निरूप्यादेवोहमनुष्योस्मि
त्यनिवदन्नादिमापारंकुर्वन्यदास्तेयोवर्त्ततेतंवेदाहमेतमितिश्रुवर्द्धिनात्र्यः। १६
अस्मिन्नर्थइतिसृष्टुरेवजीवरूपेणप्रवेशइत्रेत्यर्थः। ब्राह्मणवाक्यान्यपत्रो

दाहरतितस्रष्टेत्यादिना। एषतआत्मान्तर्यामिमृतइतिवाक्यशेषःसईक्षण
ऊर्वकंजगस्रष्टाएतमेवप्रसिद्धंसीमानंशिरःकपालसंधिंविदार्यनिष्क्रम्यैतयाद्वार
ध्रवाव्ययाद्वारातिद्रुतंप्रापद्यतदेहमध्येप्रविष्टइत्यर्थः। अंतःप्रविष्टंकस्तरिमेनं
नस्मिन्नित्रियमाणेविनष्टेएकोदेवोवरुधासंनिविष्टः इंद्रोमित्रंवरुणमग्निमाऊ
रथादिव्यःससुपर्णोगरुत्मान्। एकंसद्विप्रावरुधावदंत्यग्नियमंमातरिश्वानमाऊ
रित्यादिमंत्रब्राह्मणवादानप्यत्रसूचयतीत्याद्याः श्रुतयइतिपरमात्मवद्देहज्ञ
इतिश्रुत्यैक्येस्मृतीरप्युदाहरतिस्मृतयोपीति। शरीरेवर्त्तमानस्यापिशरीरधर्म
संस्पर्शित्वेश्रुतिंप्रमाणयति। अशरीरंशरीरेष्विति। सपर्यगाच्छुक्रमकायमव्रण
मस्नाविरंशुद्धमपापविद्धमित्यादिश्रुतयआदिशब्दार्थः। यस्मादेवंश्रुतिस्मृति
न्यायैरात्मादेहादेर्भिन्नोसंगस्तद्धर्मासंस्पृष्टश्चतस्मादितिप्रकृतमुपसंहरतितस्मा

दिति। एवं परमात्मानेदोपदेशानन्तरं वस्तुज्ञात्वयसंस्कारणादित्यमुक्तमवधार्यतन्न
स्वानुभवविरोधंशंकते। सयदीति। अज्ञत्वादेःस्वात्मन्यनुभवसिद्धत्वान्नविज्ञातृलक्षणस्व
रात्मत्वंश्रुत्यादिनिरुक्तमपिनमंन्यावयामिकिंतुन्निन्मेवतमहंमन्येनकृष्टमीश्वरं
निकृष्टसंसार्यात्मनापश्यपतःप्रत्यवायापत्तेरतस्तंदेवंस्वकर्मणानक्त्वाचाराधयत्स
सादान्मुक्तसंसारोनविष्यामीतिमन्तिरितिज्ञिप्यान्निश्चायश्त्यर्थः। मंवंवादीनेदंदर्श
नएवप्रत्यवायश्रवणादितिगुरुःपरिहरति। नैवंसोम्येति। संग्रहवाक्यमाज्ञपसमा
धानार्थंविवृणोति। कथमित्यादिना। प्रत्यक्षसिद्धस्यनदस्यकथंतद्विरुद्धप्रमाणांत
रेणप्रतिषेधश्त्याज्ञेपार्थः। अंसंसारीश्वरस्यापत्यक्षत्वान्नतेनदस्यात्मनिप्रत्यक्षत्वा
भावात्सुस्थित्वाद्यनुभवस्यन्त्यात्मप्युपपत्तेस्तद्बलात्तेनदाध्यवसायायोगादंनन्य
थासिद्धार्थश्रुतिप्रतिपिद्धोनेदोनमानमर्हतीतिसमाधानान्निश्चायःउद्धाहृताःश्रु

तयोनानेदंदर्शनमात्रंनिषेद्धंतिकिंतुनेदंदर्शनिःप्रत्यवायमप्यनर्थप्राप्तिरूपमावे
दयंतीत्याहएताएवेति। तथादिअन्योसौपरमेश्वरोमद्विलक्षणोसावंतद्विलक्षणः
संसार्येवेतियोन्यांदेवतामुपास्तेतात्पर्यणपश्यपतिनसवेदतत्वमितिनेदंदर्शनस्या
विद्यामूलत्वमुक्त्वायथापशुरेवंसदेवानामितिदेवपशुत्वप्राप्तिंतस्यदर्शयतिन
हिपराधीनात्मत्वतोन्यंहेम्नंकर्तारंवेत्तिनऽतिनथायोन्यत्रात्मदेवतामित्यात्मन
श्चथगेवब्रह्मब्राह्मणजातिंवेदतंतदेवब्रह्मब्राह्मणंत्वजातिःपरादात्मराकुर्या
त्त्वविमुखंकुर्यात्। आत्मरूपंमामनात्मतयापश्यतीतिद्वेष्यवनउहितमावद
तीत्यर्थः। एवञ्चत्रंतपरादादित्यादिसर्वंतंपरादादित्यंतमुदाहरणंऽष्टधा। ऽस्यात्म
नियोनानाऽवपश्यतिऽवज्ञादीनानात्वदर्शनस्यानासत्वद्योतनार्थःसमृत्वाःमृत्यं
संसारात्संसारंत्रनर्थपरंपरामेवाप्नोतीत्यर्थः। ऽत्यवमाद्यऽतिनेऽनास्तिकंचना

उदरमंतरंकुरुतेऽथतस्यनभयंनभवतीत्याद्याःश्रुतयोगृह्यंते।नेदंदृष्टिंनिंदित्वाऽनेद
दृष्टिंफलवत्त्वयाप्रज्ञांमंस्मस्याएवोपादेयतांदर्शयति।अनेदंप्रतिपत्तेश्चेति।तत्रश्रुते
कदेशमुदाहृत्यव्याचष्टेसत्रात्मेत्यादिना।तत्रैवाचार्यव्यतिरेकोपपत्तिपरश्रुत्यर्थमुदाह
रन्नुक्तमर्थंदृढयति।अनेदंविज्ञानादेवेति।पुरुषंसोम्योतदन्नमृष्टीतमानयंतीतिरूपंदृ
ष्टमर्थंदर्शयतीत्यर्थः।सुषुप्तोपरमात्मन्यनेदंसंपन्नावपितयाज्ञानान्नावापराधात्स्व
पुनरपिमाघादिनावेनोल्लितानांसंसारविलक्षंदर्शयंतीश्रुतिःपरमात्मानेदंनात्म
ज्ञानमेवमोक्षहेतुरितिसूचयतीत्यनिष्टेत्यादृतइहव्याघोवेत्यादिनाचेति।अन्नेवोदा
हरणांतरमाहानेदंदृष्टिनात्मस्मरतीत्यादिना।यदाह्येवैषएतस्मिन्नदरेऽनात्मेनि
क्तोनिलयनेऽभयंप्रतिष्ठांविंदतेऽथसोऽभयंगतोभवतियदाह्येवैषएतस्मिन्नुदरमंतर
कुरुतेऽथतस्यभयंभवतीत्याद्याःश्रुतयोप्युदाहर्त्तव्याइत्याहऽइतिप्रतिज्ञांस्वमिति

।यस्मादेवंनेदंदृष्टिर्निंद्याऽनेदंदृष्टिस्तुकस्माच्छ्रीवत्सब्रह्मात्मनेदोवधारितोतोब्रू
त्मणत्वाद्यन्निमानस्यात्मनिमिथ्यादृष्टित्वंसिद्धमितिप्रकृतमुपसंहरतितस्मादिति
।यदुक्तंमहंबलिपुहारनमस्कारादिर्निर्वर्त्स्यश्रमकर्मनिष्ठाराधेतिसापिदृष्टि
र्नेदंदृष्टिनापवादादेवनसम्यग्दृष्टिरित्याहतस्मात्स्तुतिपरत्वादितिनेदंविषयत्वाच्च।
कर्मेपादानस्येतिक्रियाकारकफलत्वंदाश्रयमंतरेणकर्मणःस्वरूपासिद्धेरित्यर्थः
यज्ञोपवीत्येवाधीयीतयाज्ञयेद्वेतवाऽतिश्रुतेर्यज्ञोपवीतधारणादेःकर्मसाधन
त्वावगमात्साध्यकर्मनावेतत्साधनपरिग्रहोनिरर्थकइत्यनिष्टेत्याहकर्मसाधनत्वा।
च्चयज्ञोपवीतादेरितिकर्मसाधनयोरुपादानंकर्मसाधनोपादानंतस्येतिविग्रहः।
कथंमनेदंप्रतिपत्तिमात्रेणकर्मतत्साधनप्रा[illegible]तिषेधसिद्धिःकर्मिणोप्यनेदंप्रतिपा
त्रिसंन्यवादित्याशंक्याहकर्मणामितिब्रह्मात्मैकत्वंचाहमितिविरुद्धप्रतिपत्तेरक

म्मिन्पुरुषेसमुच्चयायोगादित्यर्थः।तर्हित्रिधिकार्यतावान्निरालंबनंकर्मकांडमप्रमा
णंस्यादितिनेत्याहसंसारिणोहीति।संसारिणोज्ञात्वाद्यन्निमानवतइत्यर्थः।नपरमा
त्मनोऽनेदृङ्निनिइत्यर्थःसंसारिणोपिपरमात्मानन्यत्वात्कथंतस्यकर्मविधिरित्य
तआहनेदृङ्निनमात्रेणचततोन्यत्वमिति।नवस्कृदाद्यानेदापेक्षाकर्मविधेरिति
भावः।यदुक्तंब्रह्मात्मैक्यप्रतिपत्त्याकर्मणांतत्साधनानांचश्रुत्याप्रतिषेधःऋतइति
तद्व्यतिरेकमुखेनसाधयति।यदिकर्मणोत्यादिना।परमात्मनश्चेतिचकारादात्म
नोब्रह्मणोवानेदप्रतिपत्तिमितियोज्यं।एवमादिन्निरित्यहंब्रह्मास्मीत्यादिवाक्यंगृ
ह्यते।निश्चितस्मृपेर्वाक्येरितिसंवादिविसंवादिप्रमाणांतरासिद्धविषयत्वेसत्य।
नन्यशेषतयाचस्वार्थैकपरत्वेननिर्णीतस्वभावेरित्यर्थः।नेदृप्रतिपत्तिर्निंदामिति
।मृत्योःसमृत्युमित्यादिन्निर्वाक्येरितिशेषः।ब्राह्मणस्यब्रह्मविदःसहिमुख्योब्रा।

DR BHAU DAJI

ह्मणःसब्राह्मणइतिश्रुतेरित्यर्थः।उदाहृतवाक्यानांक्रमेणतात्पर्यमाहकर्मसिं
बंधेत्यादिना।यदिकर्मद्विर्नपरितित्याज्यिषितानितद्व्यविमुक्तंसर्वंनात्मधर्म
हितिसंबंधः।अन्निधत्रेउश्रुतिस्तंतमर्थमतोब्रह्मात्मज्ञानमिच्छताकर्महीतिपरि
त्याज्यानीत्याह।तस्मादिति।तदेवमागमावष्टंभेननिरूपितब्रह्मात्मैक्ययुक्त्यापिस्मा
वस्यापयितुमुत्तरोग्रंथः॥तत्राद्येनाग्निष्टोजीवपरमात्मानोवस्तुतोनित्योविरुद्धधर्म
संसर्गित्वाद्घीतोक्षवदित्यनुमानेनप्रत्यवतिष्ठतइत्याह।सयदीत्यादिना।एवंविरुद्धधर्म
वत्वंहेतुमुपपाद्यानुमानमाह।कथंतर्हिलक्षणइति।एवंसतिनेदृस्तात्विकत्वेकर्म
तत्साधनपरित्यागात्मकस्यसंन्यासस्यनास्त्यवसरइत्याह।संसारीचेति।तत्रानुमानं
तावद्धेत्वसिद्धिंदर्शयितुमुपक्रमतेतंप्रतिब्रूयादित्यादिना।जीवपरमात्मानावितिकि
मुपाधिनेदविशिष्टवस्तुयथाप्रतिपत्तिर्निर्दिश्यतेकिंवोचेतन्यमात्राकारं।आद्येबा

धव्यतिचोरोऽाकाशनेदवे॰दौपाधिकस्यनेदस्यावास्तवत्वाऽनेदमात्रस्य॰॰॰नेसिद्धा
धनत्वाच्चेत्यनित्रेत्यर्थः। द्वितीयेऽसिद्धिमुत्काताभुपपादयति॥तदसत्कस्मादित्यादिना
।दृष्टश्चदह्यमानेछिद्यमानेशरीरेदाहछेदवेदनायाउपलभ्यमानत्वाद्दाहादिसमा
नाश्रयेवदाहछेदादिवेदनेतियोजना।शरीरस्यैवतदुपलब्धृत्वशंकांवारयितुंतद्वि
शिनष्टिकर्मणीति।कर्मत्वंसाधयत्कपलब्धृकपलभ्यमानइति।उक्तमर्थंलोकप्रसि
द्धंदृढयतियत्रहीति।तत्रैवानुनवमपिप्रश्नपूर्वकमनिनयतिकथमित्यादिना।पुनस्त
दव्यतिरेकमुखेनोपपादयतियद्धकपलब्धुरीति।उपदिशेदित्यस्मात्पूर्वमुपलब्धारमित्य
ध्याहारःयद्युपलब्धुरिवेदनास्यात्तदाहाद्याश्रयदेहदेशावछे॰॰॰दनानिमित्तंदाहछेदादि
जवेदनाश्रयत्वेनोपलब्धारमुपदिशेल्लोकोनैवमुपदिशत्युपलभ्यतेत्रतोदाहछेदादिसमा
नाश्रयेववेदनेतियोजना।तत्रैवयुक्त्यंतरमाहस्वयंचेति।यथाचक्षुर्गतंरूपंनचक्षुषाग्रु

ह्यतेतथात्मगतावेदनात्मनानगृह्यतेकर्मकर्तृत्वविरोधादित्यर्थः। आत्मनोवेदनाश्रय
त्वनिराकरणमुपसंहरतितस्मादिति।ननुवेदनानामदुःखंनतदचेतनेदेहेसंभवतिसुख
दुःखादिधर्मिणंचेतनाश्रयत्वनियमात्यदिपुनश्चेतनोप्यात्मानवेदनाश्रयस्तदाशरीरस
म्पचेतनंनतदाश्रयइत्यनाश्रयेववेदनास्तुबोद्धैरपितथासुपगमादित्यतआहनावरूपत्वा
च्चेति।नावरूपत्वंकार्यत्वंवेदनाश्रयाकार्यत्वात्तंडुलपाकादिवदित्यर्थः।हेतोरप्रयोजक
तामाशंक्यविपक्षेबाधकमाह।वेदनासमानाश्रयइति।वेदनायानिराश्रयत्वेतन्नाशेसंस्का
रानावात्कालांतरेस्मरणंनस्यादित्यर्थः। यद्वाहेत्वसिद्धिंपरिहरतिवेदनासमनाश्रयएव
तत्संस्कारइतिवेदनायाआकार्यत्वेतत्संस्कारस्मृत्योरसंभावात्कालांतरेपादेमेवेदनादृ
दित्यादिव्यवहारोनस्यादित्यभिप्रायः। अथवासाश्रयायदिवेदनातर्ह्याकाशेयेवस्या।
दात्मनेवतत्संस्कारस्मृत्योदेरुपलंभादित्याशंक्याहवेदनासमानाश्रयएवतत्संस्कारइ

ति। यत्स्यादेवेदनोपलभ्यतेतत्स्य एवतज्जन्यःसंस्कारादिर्वेदनातत्संस्कारस्मृतीनामेकाश्र
यत्वनियमादेदनायाश्चोपलब्धिकर्मनिष्ठत्वोपपादनान्नोपलभ्यमानेतत्संस्कारादि
रित्यर्थः। तदेवानुमानेनसाधयतिस्मृतिसमानकाल एवेति। स्मृतेर्यःकालोज्ञायतत्समानका
स्यारूपस्तत्रैवोपलभ्यमानत्वात्सुखादावनुपलभ्यमानत्वाद्वेदनाविषयोवेदनासमा
नविषयःसमानाश्रयएवतत्संस्कारइत्यक्षरार्थः। तथाचायंप्रयोगःवेदनादिरनात्माश्र
योऽनात्मश्रयकालएवोपलब्धियोग्यत्वाद्देहकार्यादिवदिति। इतोपित्रनात्माश्र
यएववेदनादिरित्याह। तन्निमित्तश्चेति। तस्मावेदनायायन्निमित्तंदाहच्छेदादितद्विषयो
द्वेषोपिसंस्कारजन्याश्रयोऽनात्माश्रयइत्यर्थः। त्रयमिहप्रबुद्धकानिश्चायःदेहछिद्य। ३१ २१
मानेदह्यमानेवाहंछिन्नोदग्धइतिचदेहान्नित्यमात्मानंमन्यमानःसंतप्यतेजनस्तन्नि
मित्तकवेदनातत्संस्कारस्मृतिद्वेषांश्चदेहान्नित्यएवात्मन्यपलभतेनदेहान्नित्यमानही

नावस्थायांदेहश्चोपलभ्यमानत्वाऽनुपलब्धिकैर्विनोपलब्धाश्रयइतिसंघातस्येववेदना
दिर्नसिद्धतस्मात्क्षिणोऽयमात्मनइतिनित्यशुद्धएवात्मेति। एवंनिरूपितेर्थेदृढसंमतिमाह
तथाचोक्तंरूपेति। रूपंनीलपीतादिविषयस्तस्यसंस्कारःसूक्ष्मावस्थातदनुभवसंस्का
रोवास्मृतिहेतुःसरूपसंस्कारस्तेनसदृशोत्पन्नःसमानःआधिरुपाधिराश्रययोर्ययोरागद्वेष
योस्तोरूपसंस्कारजन्याधीःयद्वनयंत्रासस्तदपिस्वरूपसंस्कारजन्याधीत्यर्थः। किमाश्रयत्वा
मियामित्यतआहदृश्यतेधीश्रयमिति। दृश्यतेत्रयमेनहितिशेषः। संकल्पविचिकित्सादे
रप्युपलक्षणमेतत्। यद्यस्माद्रूपादिसंस्कारतज्जन्यरागादिसंबंधीसंश्रितंमेवोपलभ्यते
नतत्साक्षिसंश्रितंतत्तस्मात्क्षीज्ञाताआत्मासदाशुद्धोरागद्वेषरहितोऽनयश्चसंसार२
हितइत्यर्थः। युक्त्यासंभवत्याचोपपादितंवेदनादीनामनात्मधर्मत्वंपुनः प्रश्नपूर्वकंकृत्वा
प्रतिपाद्यंस्तदाश्रयविशेषंनिरूपयति। किमाश्रयाइत्यादिनाऽत्यादिश्रुतेरतत्संबंधि

नणवेत्यधारणान्मनोबुध्योश्चांतःकरणत्वेकत्वात्बुद्धावेवकामादयोनात्मनात्यवधा
रितमित्यर्थः।कामादेर्बुध्याश्रयत्वेपिकथंरूपादिसंस्कारसमानाश्रयत्वसिद्धिरित्याशंक्य
रूपादेरपिबुध्याश्रयत्वेश्रुतिमाह।तत्रैवेत्यादिना।कामादेरंतःकरणनिष्ठत्वेवाक्यांतर
पवतिकामायेस्पतितीतोहितदासवंछितोकानूहृदयस्पेत्फक्केःसनिदानानामेवतेषांहृ
दयाश्रयत्वंगम्पतेतस्माद्बोकनिमित्तरूपादिसंस्काराणामपिबुध्याश्रयत्वमुक्तमेवभ्र
मथासर्वविशेषणानुपपत्तेरित्यर्थः।इदानीमात्मनोवेदनाकामद्वेषाद्यसंस्पृष्टत्वेश्रुति
स्मृतीःपवतिभ्रमंगोहीत्यादिना।अतिछंदा इतिछांदसंरूपविशेषणत्वादतिछंदं।
छंदःकामोतिगतकाममसंस्पृष्टकामादिदोषमेतदात्मरूपमित्यर्थः।निर्गुणत्वादित्यादि
स्मृतिनिष्ठेतिसंबंधःइहानीसिंहावलोकितेनकामादेरनात्मधर्मत्वेश्रुत्यक्केस्मृतिमा
हिछाद्वेषादिचेति।इछाद्वेषःसुखंदुःखंसंघातश्चेतनाधृतिःएतत्क्षेत्रंसमासेनसवि
कारमुदाहृतमित्यादिस्मृतिस्पष्टेछादिक्षेत्रस्यैवधर्मेनात्मनइतियोजना।क्षेत्रस्याना
त्मत्वंद्योतयितुंविषयस्येतिविशेषणं।श्रुतिस्मृतिसिद्धमर्थमुपसंहरति।कर्मस्थैर्यादिशु
नात्मिस्थेति।इतिसिद्धमितिशेषः।परमपद्धतमुपसंहरन्तोरूपादीति।रूपादिसंस्कारा
द्यशुद्धिसंबंधाभावादेवपरमात्मादिविरोधाभावान्नपरस्मादात्मनोविलक्षणत्वमितिहे
तोःपरएवात्माहमितिप्रतिपत्तुंयुक्तमितियोजना।आत्मानमेवेत्यादिना।आत्मानंपत्रंचमेवाहंब्रह्मास्मीत्येव
क्रियार्थश्रुतिवाक्यान्युदाहरति।आत्मानमेवेत्यादिना।आत्मानंपत्रंचमेवाहंब्रह्मास्मीत्येव
दवगतवत्तद्ब्रह्मेत्यर्थः।एकधैवैकस्वरूपेणैवनत्वनुविषयत्वेननेदंनवानुद्रष्टव्यमोंकारयेपिदं
ज्ञानंतरमनुसंधेयमेतद्रूपमेयंध्रुवमितिवाक्यशेषः।सएवाधस्तादित्यादिनाभूमानंप्र
त्यानंसर्वाधिष्ठानमुपक्रम्यतस्यैताटस्यव्यंजकनिवृत्तयेऽहंकारात्मत्वमुपदिश्यपुनरह
मुपरागश्रुतपरिछेदादिनिवृत्तयेतत्साक्षित्वगेकरसतांतस्यनिर्दिशति।क्षांदोग्यपञ्च

तिरित्याहाहमेवाधस्तादितिनामादिसाधनसंपन्नःसन्सर्वमात्मानंपश्येदितिनिदिध्यासे
दित्युभिवचनांतरमाहयत्रत्वस्यसर्वमात्मैवेति।अमूत्रकेनकंपश्येदित्यादिवक्ष्यमा
णःइदंसर्वंयदयमात्मानोग्यादिलक्षणंविश्वंतत्सर्वमयमात्मानातोन्यद्दुष्कृतोस्तीत्यर्थः॥
सएवेषोऽकलोऽमृतइतिप्रश्नोपनिषदंतंवाक्यं॥सएषइत्यगात्माकलाशब्दवाच्य
एतद्धपाधिनिर्वियुक्तोऽमृतोऽमृतंब्रह्मेवेतितस्यार्थः।तदेतद्ब्रह्माहंवैमनपरमनंतर
मबाह्यमयमात्माब्रह्मेतिवाक्यंबादरायणकमुदाहरति।अनंतरमबाह्यमिति॥
मुंडकवाक्यंचतत्समानार्थमाहसबाह्याभ्यंतरइति।अमूर्त्तःपुरुषएवसबाह्याभ्यंतरःसर्वस्य
सहबाह्याभ्यंतररूपेणावर्त्ततेनान्योऽजन्मादिविक्रियारहितइत्यर्थः।ब्रह्मैवेदममृ
तंपुरस्तादित्यादिचात्रोदाहर्त्तव्यमित्याहब्रह्मैवेदमिति।इदंसर्वंब्रह्मैवेत्यर्थः।एवं
ब्रह्मात्मप्रतिपादकानिवाक्यान्युदाहृत्यब्रह्मणएवजीवात्मनाकार्यप्रवेशंवा

दिवाक्यानिचजीवस्यब्रह्मात्मत्वप्रतिपत्त्यर्थमुदाहरति।एतयाद्वारेत्यादिना।सएतमे
वसीमानंविदार्येतयाद्वारापद्यतेतिशिरःकपालयोःसंधिगतछिद्रेणदेहंप्रविश्यस्थि
तुरीश्वरस्यदर्शयितव्येतरेयकवाक्यमित्यर्थः।तत्रप्रविष्टस्यस्वरूपनिरूपणपरंवाक्यंये
नवापश्यतीत्यादिप्रज्ञानस्यनामधेयानिभवंतीत्यंतंप्रज्ञामात्रंतत्स्वरूपंप्रज्ञानंब्रह्मे
तितस्यब्रह्मात्मत्वंचतत्रोक्तमित्यभिप्रेत्याहप्रज्ञानस्यनामधेयानीति।स्थूलस्यसृष्टे
कार्यजीवरूपेणप्रवेशाभिप्रायेतदेवंतेतिरीयवाक्येनदर्शयति।सत्यंज्ञानमनंतमित्यादि
नापरमात्मैवमर्वसाक्षीसर्वभूतांतरात्मेत्यत्रश्वेताश्वतरीयमंत्रमुदाहरति।एकोदेवइ
तिशरीरादिसंसृष्टतयाप्रतीयमानस्यापिआत्मनस्तधर्मसंसर्गनिमित्तेनब्रह्मात्मनाज्ञेयत्वे
कावल्यवाक्यद्वयमुदाहरति।अशरीरंशरीरेषुनजायतेम्रियतेवाविपश्चिदितिचात्रव
स्यासाक्षिणःआत्मनोवस्याधर्मसंसर्गित्वेनब्रह्मत्वप्रतिपत्तौकावल्यवाक्यमादरेणनातंत्रा

गरितांतमिति। नेम्पारनानिरूपरथचक्रनिदर्शनेनदृश्यदर्शनेनतत्साधनभूत
सर्वजगदाश्रयरूपंघ्राणग्राह्यंतंब्रह्मैवसमेममात्मेतिपश्यत्तंकोषीतकेयोपनिषदा।
कथमुदाहरतिममत्रात्मेतिविद्यादिति। यस्मात्सर्वाणिभूतान्यात्मन्येवानुपश्यतितदे
जतितन्नेजतीतिचमंत्रद्वयमीक्षावास्यगतमुदाहृतंतत्राद्योमंत्रःस्पष्टार्थः। द्वितीयःप
रोपाधिनिबंधनंचलनादिप्रतिषेधनंस्वतस्तन्निर्विकारःशुद्धएवात्मेतिदर्शयितुमित्य
र्थः। चेनस्तत्सर्वमनुविद्यानुवानिविद्यात्मत्रविद्यंभवत्येकनीडमितिमंत्रेतैत्तिरीयाच्चा
मनंति। तस्मात्सर्वात्मकेसर्वोपादानेश्वेत्तिरमंत्रनिर्दिष्टेवस्तुनिविद्यं
समस्तंएकनीडंभवतिएकायनंवर्त्ततेतदेवविद्यानुवानिसर्वाणिभुवनानिभवतःत्र
यद्किमपस्तीतिपञ्चभूतसृष्ट्याचार्यत्रसादादनुभवन्विद्वान्ज्ञानीवेनोभवतिविनेतः
कांतिकर्मणोवनतेर्वसंभजनीयार्थस्यधातोरिदंरूपंवेनःकांतिमान्संभजनीयोभव

स्यंसिकरणंयत्रयुष्मदस्मदादिएकएवति। तदेवंश्रुतिस्मृ ३६

तीति। पुनरपिविद्वत्सर्वात्मत्वेमंत्रद्वयंपठति। तदेवाग्निस्तदादित्यस्तादित्येक:अ
मनुरभवंसूर्यश्चेतिवामदेवचाक्यरूपोपरश्चेति। अतःपविष्टःशास्ताजनानांएक:स
न्बहुधाविचारइतितैत्तिरीयश्रुतिरेकस्मैवांतर्यामिणोबहुधाविचरणंसंसार्यव
हारंवदंतीजीवपरयोरनेदंसूचयतीत्यर्थः। तत्रैवमोपक्रमेछांदोग्यवाक्यंपठति। सदेवेति
।श्रुत्यैकार्थेस्मृतीरप्याहस्मृतीश्चेतिसर्वाणिनोगुहाशयस्यैवात्मनःदृःपुराणिनत्रति
न्नारीरमात्मनेदइत्यर्थः। उदाहृतश्रुतिस्मृतिन्यायसिद्धंब्रह्मात्मैकत्वेनिहितेलोकिकवैदि
कव्यवहारविरोधंशंकतेमयदीतिगृहक्षेत्रदेहादिकंमाध्यंऐहलौकिकंदृश्यतेतत्सा
नंचप्रतिग्रहसेवाविजयपुत्रादि। तत्साधकश्रुतदृष्टिविरोधिब्राह्मणादिदृश्यते। तथायागादिस
धनंस्वर्गादिसाध्यंतत्कामश्चसाधकइतिपारलौकिकमपित्रिकंश्रूयतेस्वर्गकामोयजेत्यवंब्रा
दीत्यर्थः। ऊत्रदृश्यतेश्रूयतेवेत्याकांक्षायामाह। श्रुतिस्मृतिलोकत्रयसिद्धमिति। लोकइति

DR BHAU DAJI LAD MUSEUM

अवहर्तृजनउच्यते। देहात्मप्रसिद्धिवल्लोकप्रसिद्धेरतंत्रत्वशंकायामाह्वादिश्रुतेति।
वादिश्रुतिविप्रतिपत्तीनांविषयोविषयत्वंयस्मिन्नुक्तित्रितयेतत्तथोक्तं। अवहारस्यावि
द्याविषयत्वान्नतेनपारमार्थिकंब्रह्मात्मैक्यंविरुध्यतइतिसमाधत्तेश्रावोयड्ब्रुयादित्या।
दिना। स्पष्टोऽस्मार्थः। उक्तेर्थश्रुतीरुदाहरतियत्रवाऽस्मादिना। श्ववराहोन्मदश्चनिस्पान्नास
त्वद्योतयति। स्वप्नावस्थादृष्टांतार्थो वैशब्दः। यत्रयदाविद्यावस्थायांद्वैतान्नावेपिद्वैतमि
वदृष्टंदृश्यदर्शनमेदवन्नवतितत्तदाऽन्योऽन्यंपश्यतीत्यादिना। अन्योऽन्यंस्वमाद्वैतंकर्मद्वैतंविषयमितरेण।
चक्षुषाकरणेनेत्यर्थतिपश्यतीवेत्यर्थः। यत्रत्वेतदस्यात्मनोपलब्धृत्वंतदल्पपरिच्छिन्नंपश्यप
रिच्छिन्नंतन्मर्त्यंविनाशियत्रविजानातितत्सत्यंनासतोविद्यतेनावइति। वचनादित्यर्थः॥
द्वैतस्याविद्याऽतत्वश्रुतीरुपन्यस्यब्रह्मात्माद्वयस्यपरमार्थत्वश्रुतीरुपन्यस्यतिएक
मेवेत्यादिना। ननुसाध्यसाधनत्वेदंस्यादविद्याविषयस्तर्हिमिथ्यार्थोगोचरत्वात्कर्मकांड

मत्रमाणंस्यादितिज्ञाप्यःशंकतेयद्येवमिति। नकेवलंकर्मकांडप्रामाण्यापत्तिरेतेमि
थ्यात्वपिउज्ञानकांडेपिस्मृत्यादिवाक्यानांनिर्विषयतयाप्रामाण्यहानिप्रसंगइत्यनिष्टेत्व
दुत्पत्तिःप्रलयश्चेति। श्रुत्याकिमर्थमुच्यतइत्यनुषंगःतत्रवेदांतवाक्यजन्यंब्रह्मात्म
विज्ञानात्सांकर्मकांडप्रामाण्यापत्तिःशंक्यतेतदूर्ध्वंवितिविकल्प्याद्यंप्रत्याहात्रोच्यते॥
विद्यावतउपपत्तेरिति। श्रोत्रोतिशास्त्रमर्थवदितिन्यायात्कर्तृसाधनफलत्वेदंस्वरूपस्यज्ञा
स्वज्ञानशून्यानामपिप्रसिद्धत्वंतत्रवेदस्यातात्पर्यंद्योद्यापप्रसिद्धेनेदमाद्यंपुंसःपुरुषार्थ
साधनमविज्ञातंबोधयतःज्ञास्त्रस्यनाप्रामाण्यंशंकेत्यनिष्टप्रत्यसंगदुक्तमर्थंविवृणोतिज्ञारी
रादिनेदस्यित्यादिना। साधनेरवेष्टप्राप्तीच्छानिष्टपरिहारंवेच्छतइष्टानिष्टप्राप्तिपरिहारोपा
यविवेकमज्ञानतःज्ञानेस्तद्विषयमज्ञानंनिवर्त्तयितुंशास्त्रमित्यन्वयः। साधनेरवेष्टानिष्टप्रा
प्तिपरिहारेच्छायांनिमित्तंविशेषणांतरेणद्योतयन्नाहज्ञारीरेतिज्ञारीरादिनेदस्यज्ञारीरेंद्रि

यादिसंघातविशेषसंबंधिनीयेऽष्टानिष्टतद्धेतुकमात्मानंमन्यमानस्येतियाजनाऽत्रयं
नावःअनाद्यविद्याहृतनिजस्वभावस्यशरीरेंद्रियमनोबुद्धिप्राणैरध्यस्तात्मनावस्यपरि
छिन्नमात्मानंमन्यमानस्यस्वातिरिक्तविषयसंबंधाधीनमेवपुरुषार्थमिच्छतस्तदुपायंप
र्येषमाणस्यसाक्षात्पुरुषार्थमात्मतत्वंबोधयितुमसमर्थत्वात्स्वर्थंतदनिलषितस्वर्गादिसुखा
दिसाधनंमानांतरादविज्ञातंबोधयच्छास्त्रंतेविधिनिषेधयोर्व्यवस्थापयति।ततोविहितानुष्ठा
नान्निषिद्धपरिवर्जनाच्चाहरहरधमानात्मशुद्धरनुपचीयमानपाप्मानोनिषिद्धफलमिव
काम्यफलमपनित्याशुचिदुःखरूपंसंसारंचेतिकाम्यकर्मपरित्यागेनावद्यंकर्मैव
श्वराराधनरूपमनुतिष्ठतोतितरांशुद्धांतःकरणस्यसूक्ष्मवस्तुतत्वप्रतिपत्तियोग्योयमि
दानींज्ञातःस्यात्मतत्वज्ञानमज्ञातंपरमपुरुषार्थसाधनमुत्पादयदनयाप्रणालिकयाज्ञातो
र्थविबोधनेनाज्ञानंपुंसोनिवर्त्तयितुंशास्त्रंप्रवृत्तमित्येतदनिप्रेत्यशास्त्रैरित्थंकर्मेति।न २६

नुकिमित्येवंतात्पर्यंवर्ण्यतेप्रतीयमानसाध्यसाधनत्वेदंस्वरूपस्यापिशास्त्रशक्तितात्पर्यगो
चरताकिंनस्यादित्याशंक्योत्तरपरत्वेवाक्यत्वेदापत्तेर्मैवमित्याहनसाधेति।कस्मादन्त
रपरत्वेपिवस्तुतत्वपरत्वंनेष्यतेऽस्माभिःपुरुषार्थतात्पर्यायोगादित्यनिप्रेत्याहानि
ष्टरूपःसंसारोहिमइति।एवंकर्मकांडस्याज्ञातार्थविबोधनेतात्पर्यंनेदंस्वस्तुतत्वबो
धनेऽस्तुप्रामाण्यंशास्त्रांतस्यापाद्यत्वस्यसृष्ट्यादिवाक्यस्यसाक्षादेवंतवस्तुप्रतिपत्तिपरा
त्वान्नाप्रामाण्यशंकेत्याहतन्नेदंदृष्टिमिति।उत्पत्तिप्रलयादिरित्यादिपदात्स्थितिप्रवेश
नियमानिगृह्यंते।उत्पत्तिप्रलयादिरेकस्योपपत्तिदर्शनेनोक्तयुक्तिप्रदर्शनिघोरेणसं
सारमूलमविद्यामेवोन्मूलयतिसृष्ट्यादिवाक्यमित्यध्याहारेणयोजना।अविद्यायाःसंसा
रमूलत्वंद्योतयितुंसांविज्ञानष्टितन्नेदंदृष्टिमितिसाध्यसाधनसाधकरूपस्यनेदंस्व
दृष्टिःप्रतिनासोयमसःसातयोक्तोनामित्यर्थः।अविद्योन्मूलनेवाकिंस्यादित्यतआहावि

द्यायमुन्मूलितायामित्यादिना। एवंप्रतिष्ठितप्रज्ञस्यपरमार्थदर्शिनः साध्यसाधन
विज्ञोषबुध्यजनकत्वात्तदाकर्मकांडस्यैवस्वरूपतोऽप्रतीतेरात्मापिमिष्टमेवेतिविक
ल्पांतरपरिहारउक्तोवेदितव्यः। एवंसतियउक्तंप्राग्यद्येवंसंसारीचसन्नित्यादितदप्य
ज्ञानविजृंभितंमुमुक्षायामुत्पन्नायांकर्मतत्साधनापरित्यागेहेत्वभावादित्यनिष्ट
माह। तच्चैतदितिपांक्तरूपेतिपंचप्रकारमित्यर्थः। यज्ञमानपत्नीपुत्रवित्तत्रयसाध्य
कर्मफलभूतेतल्लोकपितृलोकदेवलोकेषणात्रयोमुक्ताःविपरीतेनोक्तानंतन्त्रनिस्व
रूपयातत्साधनसर्वकर्मतदुपकरणंसंन्यासरूपंपारिव्राज्यंकर्तव्यमित्यर्थः। आपात
तःपरोक्षतोवाधिगतब्रह्मात्मभावस्यतदापरोक्षोन्मुखस्यब्रह्मात्मैक्यादिदेहाद्यध्यासनि
बंधनकर्माधिकारित्वानिमानशैथिल्यात्तस्मोहरूपविरोधाच्चात्माज्ञमेवसत्साधनंकर्मत्य
क्तेर्थेहेतुमाहसम्यगिति। अत्रेदंदर्शनमेवसम्यग्ज्ञानंतदिछताचतद्विरुद्धानिमान

तदास्यदंसर्वंतदाप्तमित्यत्रेवश्रुतार्थापत्तिमाहनेदंदर्शनेति। मृत्योःसमृत्युमाप्नोतिय
इहनानेवपश्यतिउदरमंतरंकुरुतेअथतस्यभयंभवतीत्यादिनेदंदर्शनंप्रतिषेध
रूपोयोर्थस्तस्मोपपत्तिरुपपादनंसाधुपपद्यतेइत्यक्षरार्थः। नेदंयतत्वमुक्तानिमानस
चात्मापिकत्वेश्रुत्यातन्निषेधोनघटतेनहिप्रमाणसिद्धस्यप्रमाणेनप्रतिषेधःसंभवे
तिनचप्रतिषेधश्रुतेर्विषयांतरमुत्प्रेक्षतेअतःप्रतिषेधकवाक्यानांनेदापवादपरत्वंना
वेतदात्मानमनर्थकंस्यान्नच्चानिष्टमध्ययनविधिविरोधादितिनावः। ननुसम्यग्ज्ञानस्य
कर्मसमुच्चितस्यैवमोक्षसाधनत्वान्नविहितकर्मत्यागोयुक्तइत्यतआहनहीति। विरो
धादेवसमुच्चयस्यानुष्ठातुमशक्यत्वान्नहिधानासंभवात्कर्मजन्यस्यचानित्यत्वान्मोक्षत्व
नुपपन्नंज्ञानकर्मसमुच्चयोमोक्षसाधनमितिनावः। यद्युक्तमेवविरोधंदृष्टांतोक्त्या
दृढयतिनहीत्यादिना। निरूपितमर्थसारमुपसंहरति। तस्मादिति। इतिश्रीगिरिप्र

प्रतिबोधनविधिविधनामकंप्रकरणंविवृतं॥२॥ तदेवंशिष्यस्यदेहव्यात्मिमानापो
हिनब्रह्मरूपत्वमुपदिश्यतस्यामवस्थायांकर्मतत्साधनसंन्यासोन्यायतउपपादितोब्रा
ह्मणस्यस्वभावतः परीक्षकतयाविद्याकृतमित्यपेक्षितंतदिदानींब्रह्मरूपत्वस्याविद्यात्म
कॅमात्मनःकूटस्थतयास्वाभाविकंब्रह्मरूपत्वंचोपपादयितुंप्रकरणांतरमारभ
माणःश्रुतसंन्यासस्यमुमुक्षोःश्रुत्यश्रवणंविधितःसूचयन्शिष्यप्रश्नमवतारयति
सुखमिति। सुखमासीनमित्यनेनाविक्षिप्तचित्ततयाप्रसन्नतोक्तावद्वारिकंद्यो
॥ब्राह्मणमित्यक्त्याऽनापदिब्राह्मणोतरवर्णोपदेशोग्राह्यइतिसूचयति। परमार्थतो
ब्रह्मनिष्ठमित्यक्त्याशिष्यप्रतिबोधनसामर्थ्यंसूच्यते॥कश्चिदिति। प्राग्युक्तगुणगणा
द्यःसुपरीक्षितःशिष्यउक्तःतस्योपदेशाग्रहणकालेएकाकित्वंसूचयितुंकश्चिदित्यक्तं
॥तस्यचिह्नोपलक्षणानिब्रह्मचारीत्यादीनि। ब्रह्मणिप्रत्यक्चैतन्येचरितुंविचरितुंशीलमस्या

सौतिब्रह्मचारीब्रह्मविचारतत्परइत्यर्थः॥अनेननित्यानित्यवस्तुविचारोदर्शितः॥
विशेषणांतरेणवैराग्यमुक्तं।विवेकवैराग्यमुक्तसद्गुरुंतादिरर्थप्राप्तइतिमत्वाचरमं
विशेषणमाह।मुमुक्षुरितितच्चिज्ञानार्थंसद्गुरुमेवाभिगच्छेदित्याहेः श्रोत्रियंब्रह्म
निष्ठमित्यादिलक्षणंस्मरन्नाहविधिवदुपसन्नइति।प्रश्नप्रकारमेवादरगौरवान्नित्यादि
नोनैमित्तिकइत्यंतेनग्रंथेनसंसारमोक्षविषयएकःप्रश्नोदुःखानुभवसोत्मस्वभावत्वावि
षयोपरःकिमर्थमित्यादिप्रश्नइतिविवकः॥प्रथमप्रश्नस्यनिमित्तमाहशरीरेति।शरीरेंद्रि
यविषयनिमित्तवदनानुभवादिसंसारस्तद्धान्यत्रहंकथंसंसारान्मोक्षिष्यइतिजागरितइ
तिद्वितीयप्रश्नस्यबीजमुक्तंजाग्रच्चप्नयोर्दुःखानुभवासुप्तेचात्मनितदननुभवाच्चंग
यिष्यामीत्यर्थः।नैमित्तिकइतित्वपपद्यतेसत्यः॥उक्तयत्रफलनाहयदिस्वभावइत्या
दिना।अस्वभावपक्षमवलंब्यगुरुरुत्तरंवदन्नेतन्नत्वत्वयेतिशिष्यमाश्वासयतीत्याह

ग्रंथकारस्तंगुरुरितिकिंत्वितिमध्याहारःकार्यःइत्याशयःशिष्यउवाच।।किंनि
मित्तमितिनिमित्तनिदृत्तेमंतरेणेनिमित्तकस्मात्संतिकनिदृत्त्यनुपपत्तेस्तत्स्वरूपम
विदित्वातत्परिहारायोगात्तस्मप्रश्नःकृतःनिवर्त्तकप्रश्नस्तत्स्वभावपरिज्ञानेनतदव
लंबनार्थः।।सुखदुःखादिमत्वस्मात्स्वभावत्वोक्तोनहिकिंस्वभावत्रात्मेतिनिःस्वभावा
वरुनास्तीतिमन्वानःपृछतिकोवेति।यस्मिन्निमित्तेनिवर्त्तितेनैमित्तिकाभावस्तत्किंनि
मित्तंकिंवातस्यनिवर्त्तकमित्यन्वयः।इवशब्दोयथाशब्दार्थःरोगीरोगनिमित्तनिदृत्तौयथा
स्वभावंप्रतिपद्यतेतथादुःखनिमित्तनिदृत्तौयंस्वभावमंगीकरोतियेयंसकोवाममस्वभाव
इतियोजना।इतिशिष्योवाचेतिसंबंधः।।दृष्टवस्तुस्वरूपकथनेनोत्तरंगुरुरुवाचाविद्या
त्यादिना।साऽविद्यानिमित्तंनिदानंयस्यसंसारस्तन्निमित्तस्तस्मादितिविग्रहःतदास्वप्न
जागरितदुःखंवान्मोधर्मत्वेननानुनविप्यसीत्यर्थः।स्वरूपतोवगतपदार्थानांविशेषेषु

नुक्तयाविनेयःपृछतीत्याहशिष्योवाचेति।।वाशब्दश्चार्थेकिमाश्रयाचसेत्यर्थः।स्व
भावंप्रतिपद्ययज्जाग्रदादावपिदुःखाद्यनुभवहीनमात्मतत्त्वमुपसंपद्येयेत्यर्थः।तवस्व
रूपावरणविपर्ययाध्यासलक्षणत्वत्स्वरूपाश्रयविषयाऽविद्येतिप्रथमप्रश्नमभि
रंगुरुरुवाचेत्याहगुरुरिति।परमात्मानंपरिदृष्टस्वरूपंविपरीतंपरिछिन्नंस्वरूपमह
मस्मीतित्वंप्रतिपद्यसइतिप्रतिषेधोक्तेः।यन्निमित्तमेवंसंसार्यात्मतामेवप्रतिप
द्यसेपरिदृष्टत्वात्मत्वेविद्यमानमपिनप्रतिपद्यसेसेयमविद्यात्वदाश्रयात्वद्विप
याचत्वदनुभवसिद्धात्वेनुचिदानंदैकरसःकूटस्थ इत्यभिप्रायः।विद्यमानंचाविद्य
मानमितिनिसंसंतमनित्यमित्यर्थः।शिष्यस्यात्मनोनित्यमुक्तमंगीकृत्यसंसारि
त्वमुक्तमाक्षिपतीत्याहशिष्योवाचेति।प्रत्यक्षमहंकर्त्तेत्यादिप्रत्ययः।कर्त्तृत्वा
दिःसाश्रयोधर्मत्वाद्रूपादिवदितिसाश्रयत्वेसिद्धेश्चेतनेपाषाणादौतददर्शनात्सि

DR BHAU DAJI

त्रोपाद्येतनाश्रयत्वसिद्धिरनुमानंगुणत्वयोयःफलकर्मकर्त्राश्रितस्पर्शवत्वे
पनोक्ता।यएषसुप्तेषुजागर्त्तिकामंकामंपुरुषोनिर्मिमाणइत्यादिगमस्वादिच्छा
र्थः।विपक्षेबाधकंयुक्तिंसंगृह्णाति।अविद्यायाःस्वात्मविषयत्वानुपपत्तेरिति।अवि
द्यास्वरूपोपन्यासपूर्वकंसंगृहीतमर्थंविवृणोतिअविद्यानामेत्यादिनामिथ्याज्ञा
नमेवाविद्योक्तेतिमत्वानस्यायमनुपन्यासः।शुक्तिकायामध्यारोपयतीतिवक्ष्यमाणस्या
नुषंगः।एवमुत्तरत्राप्यनुषंगोद्रष्टव्यः।कस्मिंश्चिद्विषयेनृतेऽर्थेसतःअसिद्धस्यविषयं
तरस्माध्यारोप्याविद्येतिअसिद्धिस्तत्रात्मायदिप्रसिद्धएवस्यात्तदात्मन्यध्यासविरो
धिप्रकाशात्मकत्वान्नतस्मिन्नतधर्मप्रतिनासःस्यात्अथाप्रसिद्धस्तदाविषयासंभु।
रणकुत्वातद्धर्मप्रतिनासोनवेतुतथाचकर्तृत्वादिरात्मन्याविद्यकत्वानुपपत्तिरतः॥ ३०
स्वाभाविकएवात्मनःकर्तृत्वादिलक्षणोधर्मइत्यभिप्रायः।तत्राधिष्ठानाध्यस्तमानयो

पयत्वेनाहंप्रत्ययविषयत्वेनचप्रसिद्धयोरेवेतरस्मिन्नितराध्यासेविशेषान्नावान्नव्यभि
चारइतिशंकतेशिष्यआहेति।तथाचाहंकर्तृचिदात्मनोःइथंभावेनासांवान्नेतरे
तराध्यासइतिदार्ष्टांतिकमिष्टमितिनावः।आचार्यस्तुदेहात्मनोःप्रसिद्धत्वेपित्वा
दृन्नितनियमस्तत्रनास्तीत्यभिप्रेत्यव्यभिचारंदूषयतीत्याहगुरुरिति।सत्यंप्रसिद्धौ
देहात्मनोतत्रशृणुविशेषमितियोजना।विशेषमेवाह।नत्विति।अविविक्तप्रत्य
यविषयतयाप्रसिद्धिमेवाभिनयतिनह्ययमित्यादिना।तत्रलिंगमाहातएवहिलोमु
ह्यतेलोकइतिमोहातिशयमेवाभिनयतिनावमान्मेति।देहात्माऽक्रियाएवात्मा
कर्त्तात्माऽकर्त्तात्मावापकःपरिछिन्नःसगुणोनिर्गुणइतिलोकवादिविप्रतिपन्नः
सचेलिकोमोमुह्यमानोदृश्यतेविविक्तयोपलंभेत्विदंनस्यादित्यसिविशेषइत्थं
भूतंहरतीमंविशेषमिति।तस्मादेकज्ञानोपरक्ततयोपलंभएवाध्यस्यमानाधिष्ठान

योःसिद्धिरध्यासेपेक्ष्यतेनदृश्यकृसिद्धिरित्यतोहंकर्त्रादेःक्षित्यवहंमनुष्यइति।
वत्घाकारप्रतिभासादध्यासेपत्रसिद्धिरितिनावः।ननुत्मानात्मनोरुभयोरपि
यद्यध्यासगोचरतातदाध्यस्तस्यमिथ्यात्वादात्मनःसत्वानुपपत्तिप्रसंगइतिशं
ष्यःशंकतेनन्विति।यघदविद्याध्यारोपितंतत्त्वदसद्दृष्टंयथाशुक्तिकादौरजतादीति
व्याप्तिमुत्कापक्षेधर्मतामाहतथादेहात्मनोरपीति।अनुमानेत्वयुक्तंतदितरेतरयो
रित्यादिना।तत्रत्रव्याप्तिपक्षधर्मत्वसिद्धौसत्यामितियावत्।आत्मन्यनात्माऽनात्म
निवात्मानित्यमेवासन्नविद्यमहतिनित्यमेवेतरेतरत्राध्यस्तत्वात्शुक्तिकादौरज
तादिवत्रजतादौशुक्त्यादिवच्चेत्यवयवत्रयमभिधायोपनयनिगमनेनिर्दिशतितद्व
देहात्मनोरितिसिद्धाध्यस्तत्वाशंकांनिराकरोतितद्वानिष्टमिति।ननुनेतरेतराध्यासो
ऽगीक्रियतेयेनात्मनोप्यसत्वप्रसंगःस्यात्किंत्वन्यतराध्यासएवात्रांगीक्रियतइत्या

ङ्कतेगुरुरथेति। तद्धि पर्ययेणात्माधिष्ठानविपर्ययेणेत्यर्थः। तदेवस्पष्टयतिदेह
इति। ज्ञिप्तेर्निराकरोतिदेहस्यात्मनिमत्तीति। यथाशुक्तिकादोषात्तेवनेदंरजतमित्या
दिनातदसत्वंप्रतीयतेतथात्मन्यहमवभासेसत्येवदेहस्यासत्वमनुदयेननस्यनुदय
तत्रनुदयतएवत्स्फुरणमःप्रमाणविरोधादयुक्तइत्यर्थः। यस्मादेवंयुक्तिनस
हतेतस्मान्नाध्यासइत्स्फुरसंहरतितस्मादिति। कथंतर्ह्यहंमनुष्यइत्यादिव्यवहा
रोलोकस्येतिगुरुःङ्कतेकथंतर्हीति। ज्ञिप्तेर्मीमांसकादिमतमाश्रित्यसंयोगसं
बंधादितिसदृष्टांतमाहवंङ्गानांस्तंनवदिति। यथावंङ्गानांस्तंनानामाधारधेयभावेन
परस्परंसंयोगविङ्गेषसंतिगृहमितेकङ्गाद्यवयवेसयोगोचरत्वमवदेहात्मनोरपिसंयो
गविङ्गेषादहंमनुष्यइत्यादिसामानाधिकरण्यव्यवहारोचरत्वमित्यर्थः। सिद्धांतीपरि
ज्ञिप्तेणेतरेतराध्यासंसाधयितुमुक्तसंबंधंतावत्प्रत्याचष्टेनानित्यत्वेति। यत्संहतंतद्

निसंपरार्थंचदृष्टंयथावंङ्गास्तंनादितथायद्यात्मापिदेहादिनिःसंहतएवस्यात्तदा
सोप्यनित्यःपरार्थश्चस्यात्तद्धानिष्टमनित्यत्वेसंघातात्मवादापत्तेःपरार्थत्वेचचेत
नत्वापत्तेरित्यर्थः। एवंपरपक्षंनिराकरणेनार्थान्नित्यःस्वार्थश्चात्माःस्फुरयन्स्फुरंक
तंदेवान्यास्तिकेःसुदूरमपिगत्वासोत्स्फुरणंतव्यङ्गन्निधेत्स्वपक्षंसाधयतिकिं
चेति। तेनपरार्थेनानित्येनसंघातेनलिंगेनपरःसंघातादन्योविलक्षणस्तावदात्मानि
त्यसिद्धइतियोजनाविमतःस्वविलक्षणेशेषःसंहतत्वात्गृहवदित्यर्थः। ननुसत्यंसं
घातादचेतनादन्यश्चात्मातस्यचसंघातासंबंधोऽहंमनुष्यइतिव्यवहारानुपपत्तेस्तस्मं
बंधोवाच्यस्तत्रसंयोगविङ्गेषस्यानंगीकारेतादात्म्याध्यासःसंबंधङ्गायातंतथाच
निरात्मवादापत्तिरितिचागुरुंङ्गिष्यःस्मारयतितस्मात्संहतस्येति। तस्मात्संहतस्यसं
घातस्याङ्गिणोदेहस्वस्मिन्नध्यस्तङ्गतियाऽपिदेहस्यात्मतंत्रेणसिध्यनंगीकारादित्यर्थः

तथाचतादृशोदेहेऽध्यारोपितत्वंनहेतुनात्मनोदेहोनिर्देहकश्चात्मेतिशून्यवादप्रसंग
इत्यर्थः। किंशून्यवादप्रसंगात्तादात्म्यावनात्मन्यध्यासनिबंधनत्वेनेष्यतेनवताकिंवा
आधाराधेयभावादिसंबंधस्यप्रामाणिकस्यतद्धेतोःसत्वादितिविकल्प्यनिराकरो
तिगुरुर्नस्वभावेति। अयमर्थः। देहादिहिरूपादिमत्वात्सावयवत्वाद्घटादिवज्जडो
पिसंस्तद्विलक्षणश्चेतनात्मतयोपलभ्यतेततश्चतन्मायःपिंडवत्तस्यचेतनसंश्लेषोक्त
व्यतथात्मनःसंघातस्यादिगृश्चेतन्यमात्रस्वभावस्यनिरवयवस्याकाशवच्चतःपरिछे
दाद्यध्यादिधर्मयोगासंभवाद्देहसंश्लेषश्चतत्रास्मिंस्तत्प्रतिभासश्चतिवक्तव्यंतथाचत
रेतरधर्मसंसर्गतियान्योरितरेतराध्यासेऽनुभवानुसारेणवसिद्धेनिरधिष्ठानस्यारोप
स्यादृष्टचरत्वादारोपज्ञानेस्फुरतोर्मध्येयदन्योपरागमंतरेणकदापिस्यातंत्रेणास्फुर
तिस्वरूपेणैवारोपितंभवतियथागगनोपरक्तयास्फुरत्मालिन्यादि। यद्युतद्विपरी

तंतदितरस्मिन्नस्वरूपेणारोपितंभवतिकिंतुसंसृष्टरूपेणेवयथाशुक्लंदंडादिरूपा
दो। तत्रात्मनोदेहाद्युपरागंविनापिसुषुप्तादौस्वतःस्फुरणात्तस्मसंघातस्वरूपेणाध्या
सःकिंतुसंसृष्टत्वेनेवदेहस्तद्विपरीतत्वात्स्वरूपेणैवतिनानित्यत्वादिदोषप्रसंगश्चिदा
त्मनोनापिदेहादेर्निरात्मकत्वप्रसंगइतिनशून्यवादशंकावकाशः देहस्तुचेतन्या
नास्पदमानतयाचिद्धर्माध्यारोपाधिष्ठानत्वमुपचर्यतइतिनपरस्पराध्यासपक्षेकश्चिद्दोष
इति। स्वतोसंहतस्यात्मनःसर्वत्रसर्वदाविद्यमानत्वान्नसंघातोनिरात्मकःस्यान्नाप्या
त्मानित्यत्वादिदोषवान्स्यादित्यर्थः। आकाशस्येवेत्यत्रदृष्टांतंविवृणोतियथाकाश
मिति। स्वपक्षेदूषणेद्वारमुपसंहरतितस्मादिति। तदेवंदूषणेद्वारेणेतरेतराध्यासंता
दात्म्यमवद्यारहेतुंगाहयित्वाद्यविकल्पंनिराकार्यादि दानींपरमतेदूषणमापादा
यितुंद्वितीयमुत्थापयतियत्पुनरुक्तमिति। निराकरोतितन्त्रेति। आत्मनिदेहोस्तीत्येवं

प्रत्यक्षंतावन्नसंवेदनमिति चेद्दुः स्पष्टज्ञानात्मांदेहस्य गृहीतत्वेपि तन्मनस्त्वात्मा मगृहीत
त्वात्तद्ग्रहणान्नाक्षेत्तत्रेदमितिग्रहणानुपपत्तेः परोक्षत्वानीतिश्रुतेश्चनात्मेंद्रिय।
विषयोतोनतस्मिन्देहसंबंधः प्रत्यक्षः। अतएवनानुमानादिगोचरत्वमपीत्यन्नापि प्रत्या
नुपलब्धिर्व्यतिरेकदृष्टांतेविदृष्टेतिनहीत्यादिना। आद्यः प्रत्यक्षस्यद्वितीयोनुमान।
स्तृतीयोर्थापत्तेः। नहिकुंडेबदरवद्देहात्मनोरेकदेशसंलग्नावुपलभ्येतेऽत्युक्तेनि
त्यचित्रयोर्नदिनानुपलंभेपियथाधाराधेयभावस्तथात्रापीत्याशंक्यादानित्योचित्रमि
तिचित्रोकितायानित्यरुपलंभवद्देहाकारंकितआत्मानोपलभ्येतेतथामतिमयिम
नुष्योदेहोयमस्तीतिव्यवहारःस्यान्नतुमनुष्योहंस्थूलोहमित्यादिरितिसमुदायार्थः॥
ननुसामान्यतोगृहीतेविशेषतश्चागृहीतेविषयेविषयांतराध्यासादृष्टस्तद्देहात्मनःप्र
त्यक्षाद्यविषयत्वेकथंतत्रानात्माध्यारोपोनात्मनिवाकथमात्माध्यारोपस्तस्मात्संता

DR BHAU DA

सत्वऽत्यनिष्प्रत्यक्षाशंक्यः शंकतेकथंतर्हीति। किमात्मनः स्फुरणान्नावात्रत्राध्यासो।
नसंनवतीत्यर्थेतेकिंवाविषयत्वेनस्फुरणान्नावात्गृहीतसामान्यांशाग्रह्यमाण
विशेषांशानावाद्यतत्रनाद्यऽत्यादनायंदोषःस्वनावाप्रसिद्धत्वादात्मनइति। सूत्रक
ज्ञास्यात्मनःस्वमहिम्नवस्फुरणादित्यर्थः। नर्हीतीयऽत्यादह। नहीति। आकाशोऽत्र
त्यक्षेपीतिशेषः। अनेंद्रियकेपाकाशेनेंद्रियकत्वमदर्शनादविषयेपिस्फुरतःस्फु
त्यात्मनिविषयाध्यासोनासंनावितऽत्यर्थः। नत्वस्मावहिर्यद्युविद्यमानयोरपिस्फु
मान्यविशेषांशयोरग्निपिंगल्यादिवद्भूमादावध्यासंप्रत्यतंत्रत्वात्स्वरूपमात्रेणस्फु
रणमध्यासविरोध्याकारेणास्फुरणान्नावादध्यासोपपन्नइत्यकश्चिद्दोषऽतिदुष्टयोन
त्वध्यासज्ञानाकारपरिणामः किमात्मनऽतानात्मनः किंवोन्नयोर्नाद्यस्तस्मिकारित्वा
पत्तेरनित्यत्वादिदोषप्रसंगात्। नद्वितीयोऽचेतनस्यतदनुपपत्तेरतएवनतृतीयऽत्यनि

स्फुरणंचाधिष्ठानस्याध्यासेऽपेक्षते। तदिहात्मनः स्वरूपतः स्फुरणेप्यतृनज्ञऽदुःखांतवबानात्मव्यावृत्ताकारणवे
ज्ञानेनविरोधिनि॥३॥

वत्सशिष्यः पृच्छति। किं नगवन्निति। शिष्यानिप्रायं ज्ञात्वा गुरुः कस्मिन्नति किंस्वि
दिति पृच्छति यदीति किंतत्रस्थत्वेति शेषः। स्वानिप्रायं शिष्यः प्रकटयति। तत्राहमित्फ
क्रऽति। अनात्मनः स्वरूपेण ध्यस्तत्वान्निः स्वनावस्य तस्याध्यासकर्तृत्वानुपपत्तेरात्मे
त्यध्यासकर्तेत्युत्तरं दोषमुपन्यस्यति यद्यहमित्यादिना। आद्ये पक्षे ध्यासकर्तुरि
त्यादि नावः। द्वितीयेस्वयमेवस्वानर्थार्थप्रवृत्तत्वादनिमेशाप
रिकल्पिताहंकारादिस्थूलशरीरांतमात्मत्वेनानिमन्यमानोमिथ्येवाध्यासकर्तेति
प्रसिद्धिमुपगतः परमार्थतस्तुकूटस्थ एवात्मात्रविद्यानिवृत्त्याचसंसारनिवृत्तिर्नि = ३५
ज्ञानिवृत्त्यैवस्वप्ननिवृत्तिरितिनानुपपन्नंकिंचिदित्यनिप्रेत्यशोने। शोनेरुक्तार्थंशिष्य

बुद्धिमारोहयतिगुरुरित्याहऽत्फक्को गुरुरित्यादिनादेहाद्यात्मनावनामनर्थयिंचि
दवगच्छसिकिमितितहितोनमुंचमिस्वतंत्रत्वात्तवेतितावत्संघातविलक्षणोतात्मा
स्त्वयतिज्ञानर्थबीजनृतामितिसाक्षिणः कूटस्थत्वान्नानर्थसंबंधः परमार्थतऽत्फक्त
निप्रायमनवबुध्यमानः शिष्यः पाहनेवनगवन्निति। हेनगवन्ननकर्तृनेवज्ञाक्षमीत्यु
यः। अनिछतोपिमेनिदृत्यनावान्नाहंस्वतंत्रोन्येनकेनचित्प्रेर्यमाणएवेतिमन्येऽत्यर्थः।
यद्येवंमन्यसेनदाचितिमत्वाज्ञार्थऽतिमयेवेत्यादिनोक्तंमृषेतिगुरुः स्वानिप्रायंप्रगव
यतिनतर्हिचितिमत्वादितिननुकथमहंसंघातोज्ञात्वादितिशिष्यआहमद्यचेतन
ऽतिनवक्तुंऽतिसंघातएवत्वमित्यादीत्यर्थः। मिथ्याध्यासप्रयुक्तकर्तृत्वाद्यवनास।
संदेहेंद्रियांतःकरणगतचिदानासाविविक्ततयातद्धिष्ठात्मविषयत्वात्तस्यचाविवे
कविवेकाभ्यामात्मानःपरतंत्रत्वस्वतंत्रत्वप्रतिनासगोचरत्वाद्विवेकनिराकरणेनास्वत

रूपप्रतिघाबुद्धिः संपाद्येत्यनिष्टमाचार्यः पृच्छतीत्याहगुरुः किमेत्यादिना। शिष्यः पुनः स्वानुभवमनुसरन्नुत्तरमाहेति दर्शयतिशिष्यइति। नादंसंघातानन्यत्वेन दृष्ट्वा द्योयद्दृष्टानसत्तदनन्योयथाद्वट दृष्टेत्यर्थः। हेतोरप्रयोजकतांशंकामनवकाशयतियदीति। तेनेतिशब्दनन्यत्वेनहेतुनेत्यर्थः। नहिस्वयंस्ववेघंकिमपिनवतिस्वात्मनिवृत्तिविरोधाद्गुरुरप्यकाशातानुपपत्तेः स्वात्मा दृष्टृविषयत्वानावेतदस्मिन्प्रसंगात्तत्रवदारलोपः प्रसज्येतेतिभावः। उपनयनिगमनेदर्शयतिकिंतुज्ञानामितस्मादन्यइति। अनन्यत्वे विषयत्वानुपपत्तिरूपंबाधकमनिधायशेषंतरानावाशंघातस्यस्वशेषत्वापत्तिबाधकांतरमाहसुखदुःखेति। विक्रियाकर्तृत्वादिलक्षणेत्यर्थः। यदुक्तंचेतिशब्दमत्वानित्यत्वादिदूषवेक्रिदोषश्चप्राप्नोतीत्यर्थः। नवस्वार्थतेत्याशंक्य विषयस्यस्वार्थत्वानावंदर्शयति नोपपादयति। नचतयोरिति। सुखदुःखवेदनाविक्रिययोरित्यर्थः। दृष्टुरात्मनोदृश्यात्। ३६

दन्यत्वंशेषित्वंचोपपादितमुपसंहरतितस्मादिति। ज्ञातुर्ज्ञेयसंबंधमाहबुध्यादृमिति। यद्येवंप्रतिबुद्धोसिवत्सनतर्हिपरप्रयुक्तानवतितत्त्वमवबोधयत्याचार्यइत्याहतंगुरुरिति। ननुचितिमतोपिपरार्थत्वंकिंन्यादितिचेत्तत्रवक्तव्यंकिंचितिमात्मस्थितिमदर्थः किंवाचितिमदर्थइति। आद्येपिस्वयमेवस्वार्थस्थितिमदंतरार्थेवानाद्यनेकस्मिन्नुपकार्योपकारकनावलक्षणार्थायितिस्यायोगादित्यनिष्टेत्यद्वितीयंप्रत्याहचितिमतइति। समत्वादन्योन्यस्मिन्नन्योन्यकृतातिशयान्नावादित्यर्थः। द्वितीयंदूषयति। नापीतिशब्दचितिमदर्थत्वंचितिमतइतिदूषणानुषंगः। अचितिमतोजडस्यज्ञेडत्वादेवज्ञेषित्वानुपपत्तेरितिहेत्वर्थः। मानृत्वस्यचेतनानामपिचितिमच्छपत्वंतेषामन्योन्यार्थतांकिमितिनन्वेवदतः किमितिचेतनोधमृः स्वार्थः कल्प्यतइत्याशंक्यदृष्टविरोधान्नेवमित्याहनाप्यचितिमतोरिति। यदुक्तंचितिमतश्चितिमदर्थत्वंनोपपद्यतेसम

त्वादिति। तत्रव्यभिचारंशंकतेनन्विति। स्वामिचैतन्यस्यनृत्यदेहएववाचेतनत्वागउप
करोतिनतन्निरपेक्षंचिन्मात्रंतथानृत्यंचैतन्यस्यस्वामिदेहएववाचेतनत्वागउपकरो
तिनचैतन्यमात्रंतथादर्शनादित्यन्नेत्यपरिहरतिनैवमग्नेरितितदेवंचैतन्यस्यान
न्यत्वेसतितस्यैश्वरात्मत्वंसिद्धमतःकूटस्थएवात्मेत्यपसंहरतितत्रैवंसतीति॥
चितिमतःस्वार्थत्वमेवनपरार्थत्वंसर्वदेतिस्थितेसतीत्यर्थः। स्वबुध्यारूढमेवस्वाध्य
स्मात्करणवृत्तिकवलितमेवसर्वमध्यात्माधिभूतादिलक्षणंसंघातमयुल्लक्य
यावत्स्वरूपंतेननिर्विकारनित्यंचैतन्यस्वभावेनोपलभमेत्वमतोनित्यमुक्तोहंनसं
घाताध्यासकर्तृनिमसंघातधर्मसंसर्गीतिस्वस्यानचेत्यर्थः। नैमितिचेन्नब्रूयात्त
दागुस्रेवंब्रूयादित्याहयदिचैवमिति। मोहादेवाब्रूवमितिचेन्नब्रूयात्तदानंप्रतिगुरु
णावक्तव्यमाहकिमसाविति। ननुसंसार्यहंदुःखीनित्यमुक्तस्वभावोदीश्वरादन्यइत्या

* संघातस्यादिणोनिर्विकारस्योक्तवाकथंसंशयइतिन्नुचेनेयकूटस्थतामवगमयेदुंनुकः इतिसंशयः

बतिकथं
व्यनुषगः॥
४

दित्तमदेनुर्यथामोहोविवेकलक्षणआसीन्ममसइदानींत्वत्प्रसादान्निवृत्तःपरंतु
कूटस्थेचैतन्यस्वरूपेणेतियदिदंममकूटस्थत्वमूचिवान्नवांमत्रप्रतिविषयंज्ञा
नकृत्वालक्षयंकूटस्थचित्स्वभावेतिसंज्ञायोज्ञायतइतिशिष्यप्रश्नमुत्थापयतीत्यु
क्तःशिष्यउवाचेति। अपगतोमोहइत्यनुषंगः। शिष्यःस्वविदितमर्थंनिवेदयतिज्ञा
दीनामिति। ज्ञादयस्यरूपरमगंधास्तावत्विषयाःप्रसिद्धाःतेषामचिद्रूपत्वाच्चत
स्फुरणंनास्तिइत्यविवादं। कथंतर्हितेषांस्फूर्तिरितितदाहज्ञाद्याकारप्रत्ययोत्पत्ते
स्तेषामिति। सिद्धिरित्यनुषंगः। ज्ञाद्याकाराणांप्रत्ययरूपत्वान्नस्वातिरिक्तग्राह्य
तेतिविज्ञानवादिमतमाशंक्यमध्येनिराकरोतिप्रत्ययानामित्यारभ्यसिद्धिरित्यंतेन
। इतरेतरंव्यावृत्तानिविशेषणानिज्ञाद्याकाररूपाणियेषांतेतथा। हेतुगर्भविशे
षणं। एकाज्ञास्वभावत्वात्प्रत्ययानांस्वतएवपरोपरागंविनानीलपीताद्याकारवत्तया

त्वादिति। तत्रव्यभिचारंशंकतेनन्विति। स्वामिचैतन्यस्यहृत्पद्मेदृश्यवाचेतनत्वागउप
करोतिनतन्निरपेक्षंचिन्मात्रंतथात्मचैतन्यस्यस्वामिदेहेदृश्यवाचेतनत्वागउपकरो
तिनचैतन्यमात्रंतथादृश्यादित्यभिप्रेत्यपरिहरतिनैवमग्निरितितदेवंचैतन्यस्यान
न्यत्वेसतितस्यशुद्धात्मत्वंसिद्धमतःकूटस्थएवात्मेत्यर्थसंहरतितत्रैवंसतीति॥
चितिमतःस्वार्थत्वमेवनपरार्थत्वंसर्वदेतिस्थितेसतीत्यर्थः। स्वबुध्यारूढमेवस्वाध्य
स्यातःकरणवृत्तिकवलितमवसर्वमध्यात्माधिभूतादिलक्षणंसंघातमशुद्धत्वक्
शावच्छरूपनृतेननिर्विकारनित्यचैतन्यस्वभावेनोपलभमित्वमतोनित्यमुक्तोदृनसं
घाताध्यासकर्तृनिमंसंघातधर्मसंसर्गास्तीतिस्वस्थोभवेत्यर्थः। ननुमितिचेन्नब्रूयात्त
दागुरुरेवंब्रूयादित्याहयदिचैवमिति। मोहादेवाब्रूवमितिचेन्नब्रूयात्नदानंप्रतिगुरु
णावक्तव्यमाहकिमसाविति। ननुसंसार्यहंदुःखीनित्यमुक्तस्वभावोदीश्वरादन्यश्च

* संघातस्यादृश्यत्वेनिर्विकारस्योक्तवाक्यंसंशयइतिचेन्नुरवेनेत्यकूटस्थतामवगमयितुंयुक्तइ
तिसंशयः

दित्यमदृश्यंयन्मोहोविविक्तलक्षणोऽसीन्नममस्वदानींत्वत्प्रसादान्निवृत्तः परंतु
कूटस्थंचैतन्यस्वरूपेणेतियदिदंममकूटस्थत्वमृचिवान्नवांस्तत्रप्रतिविषयंज्ञा
नकर्तृत्वात्कथंकूटस्थचित्स्वभावेतिसंशयोज्ञायतइतिशिष्यप्रश्नमुत्थापयतीत्यु
क्तः शिष्यउवाचेति। अपगतोमोहऽस्यनुषंगःशिष्यःस्वविदितमर्थंनिवेदयतिज्ञा
दीनामिति। ज्ञानस्यज्ञप्तिरूपरमगंधास्तावत्विषयाःप्रसिद्धाःतेषामचिद्रूपत्वान्मृत
स्फुरणंनास्तिइत्यविवादं। कथंतर्हितेषांस्फूर्तिरितितदाहज्ञाताकारप्रत्ययोत्पन्न
स्तुतेषामिति। सिद्धिरित्यनुषंगः। ज्ञाताद्याकारोणांप्रत्ययरूपत्वान्नस्वातिरिक्तग्राह्य
तितिविज्ञानवादिमतमाशंक्यमध्येनिराकरोतिप्रत्ययानामित्यारभ्यसिद्धिरित्यंतेन
। इतरेतरंव्याचष्टेनिर्विशेषणेतिज्ञाताद्याकाररूपाणियेषांतेनतथा। हेनुगर्नविशे
षणं। प्रकाशस्वभावत्वात्प्रत्ययानांस्वतएवपरोपरागंविनानीलपीताद्याकारवत्तया

बतिकथ
मनुषंगः॥
४

अमंनवान्नप्रत्ययमात्रस्वरूपाः ज्ञाष्टादयश्च्यध्याहारेणयोजना। परमतनिराकर
णमुपसंहरतितस्मादिति। वाच्यआकारेःज्ञाष्टादिरूपइंद्रियसंसृष्टोयोनिमित्तंयेषांप्रत्य
यानांतेषांज्ञावोबाह्याकारनिमित्तत्वमितिविग्रहः। इतियतस्तस्मात्प्रत्यानांबाह्याका
रवच्छष्टाद्याकारत्वसिद्धिरित्यन्वयः। चेतन्यात्स्थगाकारवंतोयेज्ञाष्टादयःपराग्यवहार।
योग्यास्तकृताकारत्वसिद्धिःप्रत्ययानांनस्यतइत्यर्थः। एवंज्ञाष्टादीनांविषयाणांस्वमति
रिक्तप्रत्ययग्राह्यत्वंचेदध्यवस्यसितर्हिप्रत्ययस्वरूपेविज्ञेषाणांवसिद्धिकूटस्थत्वसि
द्धिरित्याशंक्याहतथाप्रत्ययानामपीति। नहिविषयसंसृष्टतयाज्ञासमानाविषयाका
राःप्रत्ययाःस्वप्रकाशेचेतन्यरूपानवंतःसंगमापायित्वात्किंत्वसाक्षिकाएवेत्यन्निषे
त्तव्यस्वरूपविज्ञेषविज्ञेषणनिर्देज्ञानकथयन्नहंप्रत्ययालंबनवस्तुनेदानामिति।
अहंप्रत्ययालंबनवस्त्वंतःकरणंतस्यनेदानीन्निविज्ञेषात्मकानामित्यर्थः। विमताः

प्रत्ययानःचिच्छब्दावाःसंहतत्वाच्चसंहतत्वंचागमापायवत्त्वात्ज्ञाष्टादिवद्देहादिवत्।। तथा
विमताःस्वातिरिक्तग्राहंकग्राह्याश्चेचेनत्वाच्छष्टादिवदेवेत्यर्थः। अतःपरमाकारनावात्स
त्योत्पत्त्याद्यवस्थासाक्षीनिर्विज्ञेषश्चिदात्मासिद्धएवेतिकुतःकूटस्थतायांसंज्ञायइतिना।
वाच्यमित्याहासंहतत्वेसतीति। यद्यपिसंघाताद्यन्यश्चेतन्यस्वनावःस्वार्थएवात्मातथाप्य
हंप्रत्ययानामंतःकरणवृत्तीनांनीलपीताद्याकाराणामुपलब्धोपलब्धिकर्त्रइतिहेतोर्वि
क्रियावानेवायंकूटस्थइतिमेसंज्ञायइत्यर्थः। एवंचेदृज्ञपदृज्ञानेविवेचयसिनतर्हितेसा
ज्ञायावकाज्ञइतिपरिहरतितंगुरुरुवाचनपुंसकइत्यादिना। संज्ञायायोगेहेतुमाहयतइ
तिायःपरिणामीचित्तादिस्तस्यक्रमेणस्वविषयग्राहकत्वमकूस्तग्राहकत्वंसकलस्व।
विषयावस्थाग्राहकत्वंचदृष्टंतव्यापकमात्मनःप्रत्यक्षसाक्षिणःसकाज्ञाद्यावर्त्तमानं
स्वव्याप्यंपरिणामित्वमपितस्यावर्त्तयतीतित्यात्मकविरुद्धोपलब्धेःकूटस्थत्वसि।

कर्षं

धो निश्चयएवयुक्तोनसंशयइत्यर्थः॥उक्तमेवार्थमतिरेकमाशंक्यविवृणोतिनन्वुपपाद्यति
यदिहीतिइदानींप्रकृतिघत्ययार्थपर्यालोचनयोपलब्धाकूटस्थइतिविरुद्धमितिशिष्य
शंकामुद्भावयतितत्राहेति।उपोपसर्गस्यलब्धतेश्चतोःकर्त्तरिक्तेचोविधानाच्चार्थस्यच
क्रियात्वाक्रियायाश्चोत्पत्तिविनाशवत्त्वात्कर्त्तरिकथंविक्रियारहित्यमित्यर्थः॥क्रि
येवप्रकृतिर्धात्वर्थः।कर्त्रैवचप्रत्ययार्थःसर्वत्रसुखइतिनास्तिनियमोगडिवदेनक
देशेसवितापकाशतेसवितापकाशतीत्यत्रव्यभिचारादित्यभिप्रेत्यप्रकृतेर्धात्वर्थतत्क
र्तृविवक्षयोपलब्धृत्वस्यगौणार्थत्वमेवयुक्तमित्याहगुरुःनधात्वर्थेतिसंगृह्यविवृणो
तियोहिबोद्धेतिबोधोबुद्धिपरिणामःसप्रतिविषयमध्यवसितिगच्छतीतिप्रत्ययैः॥ननु बु
द्धिरंतःकरणस्यक्षणत्वान्नित्यपरिणामस्यचमृत्परिणामघटादिवत्क्षणत्वोपपत्तेःकथंक्रि ३९
यात्वमितितत्राहसधात्वर्थेविक्रियात्मकइति।विशिष्टक्रियात्मकइत्यर्थः॥नहिमृ

DR BHAU DAJI

दादिवत्स्वाकारतिरोधाननांतःकरणपरिणामइष्यतेकिंतुजडंकावदालोकवद्भासं
कोचविकाशमरूपेणतादृशस्तुपरिणामःपरिणामिचेष्टारूपत्वात्क्रियेतिवक्तुयु
क्तइत्यभिप्रायः।तस्याःक्रियायाअनुपलब्धिरूपोपचारेणनिमित्तमाहात्मनइतिश्रोत्रा
दःस्वरूपभूतायोपलब्धिःसंज्ञानंविज्ञानघनएवेत्यादिश्रुतिसिद्धातस्माच्चानासो
वक्निःव्याप्तायःपिंडस्यवह्न्याकारत्ववच्चिदात्मव्याप्ततयाचिच्छायापत्तिःतदेवफलं
तस्यवसानस्तत्पर्यंतइतिकृत्वोपलब्धिरूपेणोपचर्यतइत्यर्थः॥तत्रानुकूलंहृद्यं त
प्राह्यमेतिअयंभावःअर्थप्रकाशोह्युपलब्धिरूपोर्थः।प्रसिद्धःसनार्थधर्मोर्थ
नंजडत्वादिसुक्तेनापयंतःकरणधर्मस्तेनापिकरणत्वोद्देतन्मप्रकाशाश्रयत्वा
योगात्तथापिस्वयंप्रकाशमानतित्यद्देतन्मान्तन्मयव्यवधानेनाहंतयेवाभासा
स्यसत्तायांप्रकाशाव्यतिरेकादात्मचेतन्यव्याप्तास्तत्रदर्थाकारावृत्तीःकुर्वदंतःकर

णमुपलब्धाकर्तृविमातानोक्तिरचयमातृलक्षर्तृत्वनोक्तवानुनविदृत्वमपदेशास्य
देनवतिःयथाऽयःपिंडोदहतिप्रकाशयतीतिनहत्राऽऽत्माचाकाशवदविक्रियत्वा
कूटस्थोपिसंसारदृगंतःकरणगतस्वाभासाविवेकान्नदेहेस्तदवस्थानिश्चमिथ्येव
मपदिश्यतेचक्षुःकोणीवर्तुलःशुक्लःस्यूलोजातोनष्टाग्निरितियथायःपिंडगताभासा
विवेकादग्निर्मपदिश्यतेनहतानस्मादंतःकरणस्यविकारिणःकर्तृत्वेपुपलब्धेःक्रि
यमाणत्वानावाऽुपलब्धिस्वरूपस्यात्मनःसिद्धंकूटस्थत्वमिति।।तत्रोक्तमर्थंवि
शदीकर्तुदृष्टांतस्यदार्ष्टांतिकानुरूपत्वंशंक्यशुक्लःशिष्यआदत्तेनचिति।उपय
त्रप्रकृतिप्रत्ययार्थयोरौपचारिकत्वमोक्तवाकथंदृष्टांतासामर्थ्यमितिगुरुराह
कथमिति।उपचरितेत्वेपुपलब्धेर्विक्रियाऽुवाचियतःछिदिक्रियासाध्यंद्वैधीभावा
दयंफलंविक्रियेवमुपलब्धिफलस्यापिफलत्वाविशेषाच्छाध्यतयाविक्रियात्वोपपत्ते

कथमुपलब्धाकूटस्थःस्यादितिशिष्योदृष्टांतासामर्थ्यमुपपादयतिछिदिछेद्यस्यादि
नाछिदिक्रियायाःछेद्यविक्रियावसानत्ववद्द्वैधीभावार्थउपलब्धिराक्षेपोपचारितोपि
आत्मोपलब्धिर्विक्रियावसानश्चेदितियोजनाछिदिक्रियायाःछेद्यंहतंद्वैधीभावपर्यंतत्व
वदात्मकर्तोपलब्धिर्विकारपर्यंतउपलब्धिधात्वर्थश्चेदित्यर्थः।।उपलब्धेःस्वरूपेणैवफल
त्वंविवक्षितेदृष्टांतानानुगुण्यमध्यस्मिंकिंवोपाधिवशादितिविकल्प्याद्यंदूषयतिमत्य
मेवमितिविशेषोनेदानींनिरस्तेनद्वैधमताघातेत्रिःमात्रपदेननेदानींदमतात्।।त्र
ज्ञानघनएवप्रज्ञानंब्रह्मेत्यादिश्रुतिप्रसिद्धंहेउमाहहीतिएवकारव्यावर्त्यमाहनता।
र्किकेतिःयद्येवमात्मतत्वंकथंतर्हिधात्वर्थफलत्ववचनमितिशिष्यःशंकतेनचिति।।
उपाधिवशात्फलत्वोपचारउपलब्धेर्नस्वरूपतइत्युक्तंस्मारयन्समाधानमविरुद्धमितिसू
गुरुरुत्तरयतिश्रेतःकरणवृत्तीनामाविद्यवितिरोभावधर्मकत्वात्तद्विशिष्टतयास्फुरणसं

गीकृत्यविषयस्यचैतन्यानेदेनप्रकाशमानवृत्तितस्थानाभाश्रयतयानासमानश्चा
त्माप्रमातेत्युच्यतेकर्मेंद्रियाण्यधिष्ठायक्रियावत्प्राणप्रधानांतःकरणलिंगगता
नासाविवेकात्कर्त्तेतिचोच्यतेशुभाशुभकर्मेपिस्यापितांतःकरणपरिणामविशेषं
तदविवेकाच्चगतमिवपश्यन्नात्मानोकेत्युच्यते। एतांसर्वामिवचित्तविलासावस्थां
स्वरूपेचैतन्यानुगमात्रेणसाक्षादवभासयन्निवभासमानोऽनुभवप्रकाशोमंदिग्धो
विपर्यस्तोऽविषयःसाक्षीउपलब्धाज्ञातेतिचव्यपदिश्यते। वृत्तिविनाशात्रकृतचिदाभा
सस्यापिविलयात्रसंस्कारसंनवेमतिसमयांतरेवृत्तिविगतविषयाकारस्मृतिवृत्युद
येतकृताभासघ्रास एवस्मर्त्तेतिव्यपदिश्यते। सएवचुचिदात्मासमस्तकार्यकारणवृंद
चोपलक्षितस्तदनुवृत्तसत्ताऽनेदेनसर्वाधिष्ठानमित्युच्यते। कारणाध्यविवेकेना ४२
नुभवज्ञानशक्तितयाचांतर्यम्यादिशब्दवाच्योपिभवतितस्मात्केनचिदुपाधिनाकुचित्

यातयामवद्घासस्वरूपत्वेनाविद्यावज्ज्ञासमानोप्यात्मास्वरूपतोनिर्विकारोनिर्धर्मि
कोसंगःकूटस्थएवसंतत्सर्वमनिवेत्योक्तमर्थंप्रश्नमुखाप्योपसंहरतिज्ञिप्यःकथंतर्ही
त्मारमतेवर्त्तेत। तेनेवाज्ञोपस्थविषयचित्रप्रचारोपलब्धेनत्यर्थः। अतःकुतस्त
त्रतवानाश्वासोज्ञायतइत्यनिप्राय॥ आत्मनोनित्यनिष्टस्थाज्ञोपस्थगतविज्ञोपतयाक
टस्थत्वेववोधितेऽवबुद्धस्वरूपःज्ञिप्यःस्वस्यांतिर्बाजमपश्यन्नष्टछेतियद्येवमिति॥
अथवाबोधप्रत्यग्रेदुपलब्धाज्ञानासफलावसानाजायंतेतदाताना त्मनिनित्यंप
रूपेनोममकोपराधश्शांक्षिपतियद्येवमिति। प्रश्नसोत्तरमाहसत्यनास्मपराधश्शंक
यंतर्हिकिंनश्शंकतेत्वयेतिममाक्षैनिश्शंकतेकिंह्यितिजिज्ञासोस्तवप्रेक्षावतउक्तार्थी
नवधानेनागंतुकदोषनिमित्तकसंनाम्यतश्शंक्षिप्तमयाक्रमितिपरिहरतिअविद्ये
ति। यद्वाज्ञेपंपरिहरतिसत्यमितिनास्मपराधस्तवस्वानुभवाप्रच्छादकत्वात्कथंत

हित्वयोक्तंममानाश्चासोजायतइतिटङ्कतिकित्विति॥अन्योस्मपराधइत्युत्तरमाद्।विद्येति
।-तदेवंयथावदात्मनःस्वरूपानवगमोविद्यानिबंधनएवसंसारित्वमधिकृतत्वमित्याधंत
धर्मविनाशेनापरमाद्येस्मीत्युपपत्तितोवगमितमात्मनःकूटस्थनित्यत्वंमिदानीमवस्था
त्रयमाक्षिप्तयाऽवस्थाधर्मास्मृतिर्विनपुनःकूटस्थतांप्रतिपादयितुमाक्षेपमुत्थापयतिय
दिनगवन्निति।स्वप्नजागरितेममेतिशेषःदृष्टेतत्पत्रकाश्यत्वान्नैवस्वप्नावगृहीतेत्रव।
स्थेइतिपरिहरतितंगुरुराहेति।संततमिति।यद्वातेनवतस्तदाननुभूयमानेनवतइत्य
र्थः।अनुभूयमानत्वमंगीकृत्यसततानुभवप्राप्त्यर्थमजानानःशिष्यआहबाढमिति।तंगु
रुराहागंतुकेत्वतइति।सुषुप्तावात्मस्वरूपेनासमानेपितयोरनवगमान्नात्मनःस्व
रूपनृतेतत्रावस्थेत्रतोविच्छिद्यविच्छिद्यानुभूयतइत्यर्थः।विमतेनात्मनृतेत्यनि ४२
वार्यवस्त्रादिवदित्युक्त्यातिरेकेणैतदेवदृष्टयतियदीत्यादिना।चैतन्यमात्रत्वादितिचि

न्मस्वरूपंचेदिति। अलौकिकप्रज्ञस्त्वंचेच्चैतन्मस्वरूपमागंतुकंपञ्चपमितहिपञ्चपंवयं
तुन्मायप्रमाणकुन्ताला अपितेच्चैतन्मस्वरूपमागंतुकंदृष्टुंघट्टयितुंवानवर्षज्ञेतेनापिम
क्रमोऽन्योवाकश्चिद्दचैतन्योपिमूढोपिनज्ञाकुयादित्यर्थः। अयंभावः चैतन्मस्मागंतुकत्वं
चैतन्मनष्टद्यतेकिंवाचैतन्मेननाघःस्वग्राह्यत्वेस्वदृत्तिविरोधात्नत्यंगुल्यग्रेणातदेवम्प
ञ्चपतेऽसिधारयावांसिधाराछिद्यते। नाप्यन्मैचैतन्मेनान्मैचैतन्मस्मागंतुकत्वंग्राह्यमन्मत्वस्मा
द्वाप्यंसिद्धेनद्वितीयोजडस्यचिद्धीनत्रकाशतयाचित्वकाशकत्वायोगात्। अत्तश्चैत
न्मनागंतुकमिति। श्रुतिश्चनवतियद्वितन्नपञ्चपतिपञ्चपंचैतन्नपञ्चपतिनहिदृष्टुर्दृष्टिवि
परिलोपोविद्यतेऽविनाशित्वान्नचुतद्वितीयमस्तिततोन्यद्विभक्तंयत्पञ्चपेदित्यादा। एव
माद्यंकल्पमनुपपन्नानिराकृत्यद्वितीयमचैतन्यापादनेननिराकरोतिसंहृतत्वादितिन
यनादिद्वारकबुद्धिदृश्युपाधिग्रस्तस्यतुसंहृतत्वात्सरार्थत्वादिकंपूर्वमेवोपपादितमिति

नदानीमुपपत्तिर्वक्तव्येत्यादृत्यवोचामेति। अत्रापिश्रुतिर्नवतिनदृष्टेर्दृष्टारंपञ्चपन्तश्रु
तेःश्रोतारंशृणुयान्मतेर्मंतारंमन्वीथानविज्ञातेर्विज्ञातारंविजानीयाइत्याद्या। अस्मि
न्नुश्रुतिवाक्येपक्षंतराहृत्वाचदृष्टादेरन्यदृष्टमाप्यतयाचैतन्मस्वभावत्वोक्तस्तदन्याद
ष्ट्रादिस्वरूपप्रकाशकत्वेनदृष्ट्रादिशब्दैर्निर्दिष्टःसाक्षीनित्यचैतन्मस्वभावःसिद्धइत्यु
पसंहरतिचैतन्मस्वरूपस्यत्विति। उक्तमेवार्थंयुक्त्यंतरेणोपपादयंस्तंकामुद्भावयति।
नन्वियंतिउत्तरंसंग्रहेणाहनन्वाहतत्वादिति। व्याहतत्वमेवप्रश्नपूर्वकंविवृणोतिकथ
मित्यादिना। नकिंचिदितिपुनःस्निग्धप्रश्नःपञ्चपस्वहीतिगुरोरुक्तिःपञ्चोदृष्टादृष्टिमान्
वत्वंतुभिन्नइत्यर्थः। यस्मादित्यादिस्तुपपादनपरोग्रंथःसुष्ठार्थः॥ सुषुप्तेमयाकिंचिन्न
दृष्टमित्युत्थितस्यपरामर्शानुपपत्तासौषुप्तानुभवस्यावश्यंनावान्नद्वाकरणोपसंहारा
दागंतुकानुभवासंभवाच्चस्वरूपेचैतन्यमनागंतुककूटस्थात्मरूपंसिद्धमित्युपसंहरति।

येत्यादिना। चेतन्यस्य स्वतःसिद्धत्वे हेतुमुपपादयति स्वतःसिद्धस्य हि प्रमातुरिति। हिशब्दो लो
कानुभवप्रसिद्धिद्योतनार्थः स्वतःसिद्धः प्रमाणनिरपेक्षश्चेत्येवंसिद्धः प्रमाणप्रवृत्तेः प्रा
गेव प्रकाशमानश्चेतियावत्। एवंविधस्य प्रमातुर्यदन्यत्प्रमेयं दृश्यंतस्य परिच्छित्तिस्फुर्ति
प्रतिप्रमाणापेक्षानुमातृस्वरूपपरिच्छित्तिप्रतिप्रमाणापेक्षेत्यर्थः। यावत्यस्मापरिच्छि
त्तिरूपस्याचेतनस्यपरिच्छेदायावन्नामनायनित्यास्वतःसिद्धावाम्मापरिच्छित्तिःसंविद=
पेक्षतेसाकिंकूटस्थेवयतोनित्यास्वयंज्योतिःस्वभावाचेतियोजना। तांप्रतिस्वरूपकू
टस्यनित्यसंविदंप्रतिआत्मनिसंविद्रूपेविषयेप्रमाणत्वेतत्सत्तानिश्चयफलव्यापा
रात्मत्वेप्रमातृत्वेवातादृग्व्यापाराश्रयत्वेवानप्रमाणापेक्षाप्रमात्रपेक्षावास्तीत्यर्थः। अ
यंभावश्चेतःकरणवृत्तिप्रतिबिंबितंहिचैतन्यंप्रमाणमिष्यतेवृत्तिमदंतःकरणप्रति
बिंबितंप्रमातृतदुभयंप्रमेयावभासमप्रमेयेनानवभासमानंनवतितथासतिप्रमेयस्यव

स्वतःस्फुरणशंकापातादितिदोषप्रसंगात्तदवभासश्चेतरात्प्रमाणांतरा
धानवतिअनवस्थाप्रसंगादनुपपत्तेश्चेत्यतःस्वप्रकाशतयैवप्रमातृप्रमाणप्रमेय
नामवभासकस्यात्मनःसिद्धिरितितस्यसिद्धानित्यस्वप्रकाशकूटस्थविदात्मतेति। स्व
प्रकाशस्वभावस्यैवप्रकाशकांतरापेक्षानप्रकाशस्वभावसित्कुतस्तथेदृष्टांतोक्त्याद्रु
ढिमारोहयति। यथाप्रकाशनमिति। ननुसंविदःप्रमाणफलत्वप्रसिद्धेःकथंनित्यत्वमि
त्याशंक्याह नित्यत्वएवेति॥ अथविगतिर्हिप्रमानतस्याःस्वरूपतएवानित्यत्वेकुतस्त
कमस्तीतिसमाधत्तेनावगतेरिति। संग्रहेविद्यतेतिनहीति। चक्षुरादिद्वारकबुद्धिवृत्ति
व्यक्तायाअवगतेःप्रमात्वेसतिनित्यायाःप्रमात्वंननुवत्यनित्यापास्तुनवतीतिविज्ञप्तेर्नहि
गम्यतेविनिगमनावादित्यर्थः। तत्रविनिगमनावोऽसिद्धइतिशिष्यःशंकतेनित्या
यामितिअवगतेर्नित्यत्वेकारकव्यापारेवयर्थ्यंस्यादित्यंविज्ञप्तश्चेत्यर्थः। प्रमातुःखा

DR. BHAU DA

वगतेर्नित्यत्वप्रमाणव्यापारैर्वयर्थ्यमापाद्यतेकिंवा विषयावगतेर्नित्यत्वेनाद्यक्षण्यप
त्तिरित्याह सिद्धातहीति। नित्यावगतिपक्षे प्रमाणेनैरपेक्ष्यंचेच्चयानुमंस्यतेतर्हिप्रमातु-
रात्मनःस्वरूपमस्वतःसिद्धिःस्वप्रकाशताप्रमाणनिरपेक्षतेयवसिद्धेत्यर्थः। अनित्यस्या
स्वप्रकाशस्यचजडत्वादात्मत्वानुपपत्तिरित्यनिष्टायः नन्वात्मप्रमायानित्यत्वाद्यदि प्र
माणनपेक्षातर्हिप्रमात्रवस्येवतन्त्रनित्यत्वात्प्रमाणनपेक्षाकिंनस्यादितिशंकतेअ।
त्रोवपीति। प्रमात्रावपीत्यर्थः। परिहरतिनावगतेरिति। अवगतेरात्मनिमग्नावादेवप्र-
माणनपेक्षानद्यवगत्यात्मावशंकावकाशोसंहतस्यसंघातसाक्षिणाश्रितिमत्त्वोपपादना
दित्यर्थः। अथवाआत्मसिद्धिःप्रमाणंनापेक्षतइतिवदताप्रमाणात्मावमपेक्षतइत्युक्तंस्या ४५
दितिमत्वातदपेक्षापितवनोपपद्यतेआत्मसिद्धेर्नित्यत्वादेवतिशंकतेअत्रावपीति।
स्वतःसिद्धिप्रमाणनैरपेक्ष्यशब्दाभ्यांतत्रकाशमानात्मस्वरूपस्यैवविवक्षितत्वा

त्रशंकावकाशइति। परिहरतिनावगतेरिति। इदानीं प्रमातुःस्वसिद्धिर्निरपेक्षैवे
त्यतद्विपक्षबाधकेपन्यासेनसाधयन्नित्यायात्रापिप्रमायाविषयावगतित्वसिद्धये
विषयस्यत्वंसंपादयितुंप्रमाणव्यापारापेक्षास्तीतिसूचयन्पक्षांतरमपाकरोति
प्रमातुश्चेदित्यादिना॥ अयमर्थः॥ सर्ववस्तुज्ञाततयाऽज्ञाततयावासाक्षिचेत
न्यस्यविषयएवशंतिस्थितेकदाचिद्दज्ञातत्वेननिर्विकल्पकसाक्षिकातस्मज्ञा
तत्वव्यवहारसिद्धयेयस्यप्रमिणोत्पद्यतेसएवतदाप्रमाता [illegible] प्रमाणव्या
पाराश्रयइत्युच्यतेतत्रप्रमातुःस्वरूपसिद्धिश्चेत्प्रमाणापेक्षासातदाकस्यप्रमि
ज्ञास्यात्तस्यैववात्मस्यवा। प्रमातुर्मिथश्चस्वविषयान्यविषयावासर्वथापिनोपपद्य
तइति। तत्रेच्छाप्रयत्नस्मृतिसंस्कारादिगोचरत्वंनिराकुर्वन्प्रमातृकत्वमात्मनोनिराकरोति
तदीयाचेति। कर्मविषयानकर्तृविषयेत्यर्थः॥ कर्तृविकर्मापिकिंनस्यादित्याशंक्यैकस्मा

क्रियायामेकस्यैवगुणप्रधाननावेनकर्तृकर्मतयोर्वैरूप्यप्रसंगोऽभवमित्यनिष्टप्रसङ्ग
प्रमाहकत्वेत्वयमसिद्धस्तस्यसाधकत्वानुपपत्तेरकरणस्यचनिर्ज्ञानतयासाधकत्वा
संभवात्तस्यापिसिद्धावप्यपेक्षायांतस्यापितथात्वमित्यनवस्थामाहप्रमाहविषयत्व
इति।प्रमाचुरनवस्थामेवनिनयति।त्रैरूप्यस्येति।नकामनवस्थामिच्छायामतिदिश
तिएवमेवेति।आत्मनोऽप्रमेयत्वेहेत्वंतरमाहप्रमातुरिति।।एतदेवस्पष्टयतिलोके।
हीति।इच्छाजन्मावहितमिष्यमाणंनवतिस्मृतिजन्मावहितंस्मर्त्रंप्रयत्नजन्म
अवहितंचक्रियासाध्यंप्रयतितव्यंप्रमाकरणव्यापारोत्पत्तिमवहितंप्रमेयमितिहि
लोकप्रसिद्धमित्यर्थः।सिध्यतीतिनिष्पत्तिप्रकाशकयोर्निर्देशः।त्रैरूप्यमुक्तंव्यति
रेकमाहनान्यथेति।त्रैरूप्यंहृश्यश्चप्रकाश्यप्राप्योःसाधारणंसुषुप्तस्यापिप्रमेय ४६
सिद्धिप्रसंगादितिनावः।तर्हिप्रमातुरपिसिद्धिरिच्छादिजन्मावहितवनवचनेना

हनचेति।।स्वयमेवप्रमातास्वस्मैवप्रमातुरिच्छादीनामन्यतमेनापिव्यवहितःक
ल्पयितुंनचकेनचिच्छक्यइत्यन्वयः।तत्रहेत्वमाहस्मृतिश्चेत्यादिनास्मृतीच्छयोःस्व
श्रयविषयकत्वेबाधकमाहस्मर्त्रिच्छावद्विषयत्वेहीति।स्मर्त्रिचेच्छावांश्चस्मर्त्रि
च्छावंतौतौविषयौयस्यास्मयोर्निष्ठःस्मर्त्रिच्छावद्विषयत्वंतस्मिन्नितिविग्रहः।उभयो
स्मृतीच्छयोरित्यर्थः।स्मर्तुःस्मृतिव्यापत्वायोगात्स्मर्त्रंतरस्मृतिविषयतावक्तव्य
तथाचैकस्मिन्नात्मनिस्मर्त्रंतरानुपगमेनस्मापिष्टवसमानयोगक्षेमतयास्मृ
त्यनवस्थासादित्यर्थः।उत्सर्मिच्छायाःप्रयत्नस्मेतिचद्रष्टव्यं।तदेवमात्मनिनप्रमा
णव्यापारपक्षाप्रमातुःस्वविषयप्रमाणक्रियाश्रयत्वायोगात्प्रमात्रंतरकल्पनाया
मनवस्थानादप्रमेयएवात्मासिध्यतितस्यचज्ञात्यविप्रमावच्छेदायप्रमाणव्यापार
पेक्षाःसंभवान्ततश्चयथ्र्यमितिचोक्तावगतेःसतोनित्यत्वंसाधितंइदानींप्रकारांतरं

णतदेवसाधयितुंइदंपक्षयतिउपमाइविषयेति।यद्विषयावगतिरुत्पद्यतेसोवग
तःसिद्धइतिचोच्यतेउपमानुश्चावगत्यनुत्पत्तौउपमानादुपपन्नएवसदास्पादित्यर्थः॥
स्यादेतत्किंनुपुनस्साम्यपरिहारायात्मनोवगतःसिद्धइतिचोच्यतेउपमानुश्चावगत्यनुत्प
त्तौउपमानादुपपन्नएवसदास्पादित्यर्थः।तत्रकिंनुपुनस्साम्यपरिहारायात्मनोवग
तिविषयइंवक्तव्यमित्यभिप्रायःकिंवानुपुनस्साम्यपरिहारमात्रंवक्तव्यमितितत्रना
घइत्याहनावगंतुरितिअवगंतुरवगतिविषयत्वेत्वाश्रयावगतिव्याप्यत्वायोगा
दवगंतृतावगतिविषयइंवाच्यंतथाचानवस्थाइर्वत्स्मृतीछाविषयत्ववत्स्यादि
त्यर्थः।द्वितीयंपक्षमादावगतिश्चेतिअत्रायंपुरुषःस्वयंज्योतिरात्मैवास्यज्योतिरेषोस्य
परमोलोकःनविज्ञातुर्विज्ञातेर्विपरिलोपोविद्यतइत्यादिश्रुतेरात्मनोनित्यप्रकाश
स्वभावत्वावगमादयुक्तप्रकाशत्ववद्घटस्यावगतिरूपेऽवगत्युत्पत्तेपेक्षाभावान्न

सुखमनुभवतीतिनावः।विपक्षेचोक्तंदोषंस्मारयतिअवगतेश्चैतन्यात्मनोति
षइति।उक्तमेवोपपत्तिंश्लोकइर्वकमुपन्यस्यतिकथमित्यादिना।स्मृत्यादेःस्मृ
तीछादिरूपाद्यवधानाद्विछेदाच्चैतन्यज्योतिषःसांतरत्वमिछादिहेत्यंतरइर्वक
त्वमित्यर्थः।किंतत्रस्यात्तदाहतंतश्चेति।आत्मायदागंतुकचित्प्रकाशविषयःस्या
त्तदासंहतःपरार्थश्चस्यात्इंद्रियांतःकरणघटादिवदिति।फलितमाहयदाचे
ति।।चैतन्यज्योतिस्सछदार्थः।।यदाचात्मनितदुत्पन्नंविद्यतेतदानेवमात्मनःस्वाथ
त्वंसंभवतीत्यन्वयः।तत्रहेतुमाहतन्नावेति।तस्यसंहतत्वस्यनावान्नावोतदपेक्षादी
तियोजना।।आगंतुकचित्प्रकाशंगम्यस्यात्मत्वनियमात्तस्यचपारार्थ्यात्तद्विल
क्षणआत्मानित्यश्चैतन्यस्वरूपएवसन्नेदेवावभासतइत्युपसंहरतितस्मादिति।
इदानींनित्यश्चैतन्यस्वरूपत्वेउपमातृत्वानुपपत्तिंशंकतेनन्विति।।जन्यप्रमाश्रयत्वा

नावेपिप्रमाइत्वव्यपदेशउपपद्यतइतिपरिहरतिउच्यतइत्यादिना। तत्रविज्ञेयस्वरूपविज्ञेपःसंग्रहेविवक्षणीतिश्रवणतइति। तत्रदृष्टांतमाहयथेति। तिष्ठतिह्यचलत्वेर्थेप्रयुज्यतेतत्रकिंचिन्निमित्तपूर्वकमेवाचलनंभवतियथाजंगमज्ञातंकिंचिच्चलनमेवमवधायस्थावरज्ञातंतुनयत्रनिमित्तव्यपदेशेन कश्चिद्विशेषोवगम्यतेतथाप्रमातेतिनित्यप्रमाश्रयत्वेपिव्यपदेशेनविरुध्यतइत्यर्थः। फलसामान्यादितीतिफलस्वरूपेप्रमायांविज्ञेपानावादित्यर्थः। अयमाशयःप्रमाणफलेहप्रमासाचचित्प्रकाशरूपाप्रमाइतेतेववक्तव्याअन्यथाविषयगतत्वमयेदंविदितमितिस्वात्मनिज्ञानज्ञेयसंबंधानुपपत्तेःजडस्यचांतःकरणेद्रव्यपारा॥ श्रयत्वेपिचिदाश्रयत्वायोगात्प्रमाइज्ञानुपपत्तेश्चिदात्मनस्तुकूटस्थत्वात्। आपारवत्वायोगात्प्रमोपतिकर्तृत्वानुपपत्तेर्मुख्यमाइत्योजडाजडयोरुभयोरपिप्रमाइ

त्वव्यपदेशायोग्यत्वात्परस्पराध्यासेनव्यवहारप्रवृत्तेर्मिथ्येवात्मनोबाह्यविषयेपिप्रमाइत्वमितिस्थितेस्वात्मनिस्वयंप्रकाशस्वभावेकुतःप्रमाइत्वज्ञांकावकाशःकुतस्तरामनवस्थाप्रसंगःकुतस्तमांचप्रमाणापेक्षेतिएवंकूटस्थनित्यचैतन्यस्योतिपोतःकारणोपाधिसंबंधजानमोपाधिकंप्रमाइत्वमुपपाद्येदानींकर्तृत्वमापितथैवेतिप्रतिपादयितुंचोद्यमुद्भावयतिश्रात्रादितिं। तत्रादीनामिवेतिव्यतिरेकदृष्टांतः। तत्रकाष्टवर्धकः। वासीतदायुधविशेषः। कस्मान्नोपपद्यतइत्यतत्राहा। संहतस्वभावस्येतितत्रादिदृष्टांतविवक्षणीतितत्रादीनांत्विति। श्रनवस्थानस्मादितिसंबंधः। इतिशब्दःशंकासमाप्त्यर्थः। श्रसंहतस्यकर्तृत्वादर्शनादात्मनोपिसंहतत्वंसिद्धयेदितिस्वात्मनिज्ञानज्ञेयसंबंधानुपपत्तेरित्यत्रकिंवावस्तुतस्तस्यकर्तृत्वाभावइतिवक्तव्यं। तत्राद्यःपक्षस्तत्रात्मनःकूटस्थत्वसाधनेनैवापोदितत्वादनवसरदुस्थइतिमत्वाद्वितीयमंगीकृत्यसंह॥

तस्वभावस्यकरणानुपादानइति।स्यादेतन्मेकर्तृत्वमस्तीत्यर्थः।अयंभावःकर्तृत्वंद्विधा।
क्रियाकरणोपादानसाध्यंक्वचित्स्वसान्निध्यमात्रनिबंधनंतत्रकरणोपादानसाध्यक
र्तृत्वंवस्तुतआत्मनःकरणोपादानासंभवाकर्तृत्वाभावःपारमार्थिकःतथापिलोकि
कमायावीवैतेजसवद्वात्मनःकर्तृत्वप्रतिभासोमायाप्रत्यूपस्थापितांतःकरणवि
कारविवेकादुपपद्यते।।द्वितीयंतुतद्वाद्यात्मनःस्वहस्तादिव्यापारयिष्टवस्तूपकर्तृ
त्वस्वसान्निध्यातिरिक्तस्यकरणादेरभाववदात्मनोपिसकलकरणसाक्षितयासन्नि।
धिमात्रेणैवकर्तृत्वव्यपदेशउपपद्यतइतिपरमार्थतोकर्तृत्वमुपाध्यविवेकात्कर्तृत्व
व्यपदेशश्चेत्तिनकिंचनावद्यमिति।।तथाचपारमर्षसूत्रद्वयंकृत्शास्त्रार्थवद्वातायं
यावतद्वोनयथेतिचतस्यस्वतंत्रएवकरिष्यात्मेति।कर्ममीमांसकमतमाशंक्य
प्रत्याहनचक्रियेति।क्रियाशब्दःकिंप्रयत्नवचनस्तद्व्याप्यधात्वर्थवचनोवातत्साध्या

श्रयवचनोवेतिविकल्प्याद्यंप्रत्याहअनिर्वर्त्तितायाइति।नहिस्वयमसिद्धःप
रंसाधयतीत्यायाद्यर्थः।तृतीयेपिकिंतन्निष्पाद्यंनियोगाख्यमदृष्टंविवक्षि
तमुतदृष्टनिवृत्तंधर्माधर्मसंज्ञंनाद्यःदृष्टेक्रियाफलेनुवृत्तेःनचलिंगादिश्रवणस
मनंतरंप्रतीयमानाकारंप्रवर्त्तयत्यात्मानमितिवाच्यंप्रतीतिकालेयद्यस्तीतिबु।
द्धिस्तदासिद्धत्वप्रतीतिर्नकारयिष्टवंनास्तीतिप्रतीतोवंध्यासुतवन्नकारयिष्टंसा
धारणप्रतीतौचपक्षेनिवृत्तिसंभवान्नप्रेरकत्वसिद्धिरित्यनिष्टंद्वितीयमुत्थाप
यतिस्थेति।।यदपिमत्सूर्वसिद्धंतदचेतनंचेतनंवाआद्येनप्रेरकत्वंसंभवतीत्याह
निमादिना।आदिशब्दात्प्रेरकत्वग्रहः।तथाचात्मनःकर्तृत्वेसतिलब्धस्वरूपस्याद
ष्टस्यप्रेरकत्वसिद्धिस्तस्मिंश्चावश्यसिद्धिरित्यसोन्यायइतिभावः।द्वितीयंप्रत्याहन
हीति।अदृष्टमचेतनमात्मासत्वाच्छादिवदित्यर्थः।स्वप्रमाणकंस्वतःसिद्धमिति।

यावत्।।अतःस्वसत्तास्फुर्त्यपेक्षमात्मसापेक्षमकुतस्त्वेरकत्वसंनवश्तिनावः।।ज्ञ
ष्टादीनामात्मसापेक्षसिद्धिकत्वेष्टवेक्तिस्मारयतिज्ञाष्टादिसर्वमिवेति।एवंमीमांस
कशंकानिराकृताइदानीक्षेत्रज्ञातिरिक्तोपीश्वरोवात्माश्रयःक्षेरकश्चास्तीतिनेयायि
कशंकामपाकुर्वन्नात्मान्यसाचेतनत्वानुमानेव्यभिचारप्रसक्तिंवारयतिज्ञवगतिश्चे
दिति।ईश्वरोवस्तुतस्त्रात्मनिन्नोननवतिज्ञवगत्याश्रयत्वात्स्वगात्मवदित्यनुमाना
नुगृहीतायमात्मा ब्रह्मत्वादिश्रुतेरात्मनोन्योनचेतनोस्तिसचात्मकृतईश्वरोदेहादि
दिनिरसंहतःस्वार्थःस्वतंत्रोनपरतंत्रइतिनक्रियाज्ञोपीतज्ञात्मनःकर्तृचिन्त्रमा
त्रसिद्धमित्यर्थःईश्वरात्मनोजगत्कर्तृत्वमपिमायाद्वारकमेवेतिनक्वापिकर्तृत्वंपर
मार्थमितिनावः।नस्वगत्याश्रयत्वाकथमसंहतत्वादिर्यतोदेहादेःसंहतस्यापवग
त्याश्रयत्वमस्तीतिलोकायतमतमाशंक्याहनचेतिदेहादिर्नविगत्याश्रयोऽवगम्यमा

नत्वाद्यदादिवदित्यर्थः।ननुकथंदेहादेरवगन्त्यवसानप्रत्ययापेक्षसिद्धिकत्वंया
वतामनुष्याद्यपज्ञामिज्ञानामीतिस्वसंवेद्यप्रमनुनयनइतिज्ञांकतेनचिति।अनुन
वमात्रमंगीकरोतिवाढमिति।नायमनुनवःस्वतिबंधनःकिंतुदेहात्मनोरविवेक
निबंधनइतिप्रत्याययतिज्ञाग्रत्येवंस्वादित्यादिनायदिदेहःस्वयंप्रकाशस्वनावःस्या
त्तदास्वसत्तायांप्रमाणनिरपेक्षस्वनावत्वात्सुषुप्तिमरणावस्थस्यापिप्रमाणानपे
क्षसिद्धित्वंस्यान्नचेवमस्तितस्मादचेतनोदेहइत्यर्थःदेहउत्क्रम्यापिक्रियादावति
दिज्ञातितथेंद्रियाणामिति।।तथादेहवत्प्रमाणापेक्षयैवसिद्धिरित्यर्थः।किंच
देहादिरनात्मानौतिकत्वाद्बाह्यवदित्याहबाह्याएवहीति।।भूतान्येवग्राह्यग्राहक
करणतदायतनत्वेनपरिणमंतेउपकार्यापिकारकनावेनमिथःसंहतानीसमान।
योनित्वनियमादितिनावः।।ननुसिद्धिरितिनिःपत्तिरुच्यतेसानप्रत्यक्षाद्यपेक्षेतित

त्राहसिद्धिरितिचेति।देहाकारपरिणतेषुभूतेषुमदशक्तिवदवगतिरुत्पद्यतइतिन
स्याश्रयिनोतिकर्तृमविशिष्टमितिलोकायतिकशंकामपाकुर्वन्नवगतिस्वरूपमा
हनाचेति।इतिचावोचामित्यनुषंगः।अवगतेःकूटस्थत्वेतस्याःफलत्वप्रसिद्धिवि
रोधंशंकतेअत्राहेति।।अकार्यरूपायाश्चप्यवगतेःकार्यत्वंकृपाकाशकार्यत्वव
पचर्यतइतिनफलत्वप्रसिद्धिविरोधइतिपरिहरतिश्रुत्वंतमाहनविप्रतिषि
द्धमिति।।उपचारनिमित्तंपृच्छतिकथंनहीतिउत्तरमाहकूटस्थतितारथ्यादिति
प्रत्यक्षादिप्रत्ययस्यबुद्धिवृत्तेर्विषयसंसृष्टतयावगत्यनित्यत्वंयर्थत्वादित्यर्थः।न
देवंकूटस्थावगतिरूपेआत्मनिप्रमातृत्वंकर्तृत्वंफलत्वंचकल्पनामात्रमित्युपपादि
तंसंहतस्यचदेहादेर्विषयपर्यंतस्यपारार्थ्यज्ञाज्ञेयपराधीनसिद्धिकत्वंचोक्तं।।इदानी
मवमात्मानात्मनोरवगमितंतत्त्वमवगम्यशिष्यःस्वावगतमर्थंगुरुंप्रतिनिवेदयन्नाह

तत्त्वमात्मनःसंज्ञावेद्यंतस्मृपात्वंप्रकटयतियद्यवंनगवन्नित्यादिना।।इन
गवन्यद्यवंप्रत्यगात्मतत्वंकूटस्थत्वादिविशेषणवत्यात्मकंतर्हिनप्रमाद्वा
दिधर्मकंयतोऽतःप्रमाणनिरपेक्षाद्यात्परमार्थतःप्रमात्रज्ञावेप्रमाणस्याप्यतो
वाऽन्यनिरपेक्षसिद्धिकंततःप्रत्यगात्मनोन्यदचेतनंपरमरापकार्यापिकारकमवि
नसंहत्यसमवहारप्रवर्त्तकत्वात्परार्थंचेतनार्थंचैतन्यप्रतिभासमात्रसिद्धंस्वतसिद्ध
वदनृतमित्यर्थः।ननुसुखदुःखमोहात्वयित्वेनदृश्यस्यसत्वरजःतमोरूपप्रकृतिका
र्यत्वावगमाकथमनृतत्वमितिसांख्यशंकामपाकरोतियेनचेति।येनदृश्यमानका
रणसुखदुःखमोहदृश्यप्रत्ययावगतिरूपेणज्ञेयंपरार्थंज्ञाकृशोपवस्तुतोयतस्तेने
वरूपेणात्मनःस्वस्यदृश्यस्यतियावतश्चास्तित्वंसज्ञावोन्येनसद्यात्मनारूपांत
रेणनत्रप्रमाणज्ञावादृतःपरमार्थतोनास्तित्वंमवदृश्यस्यार्थः।किंचनिमतंज्ञाय।

DR BHAU DAJI

स्वप्नावस्थंदृश्यंनावगतिव्यतिरेकेणक्वचिदपिपरमार्थसद्रूपत्वाज्जडत्वाद्घटरज्जुम
पादिवदित्याहयथाहीति।घटंदृश्यस्यसापेक्षत्वेनमायामयत्वेसंनावितेदृष्टत्वम।
द्वैतमनुनवामृदंममसंवृत्तमित्याहएवमेवेति।एवंसतीत्यर्थःनेरंतर्यंनावादेवेत्येव
कारोयोज्यः।अथवायथाद्वैतस्यदृश्यस्यतेनरूपेणपरमार्थतोसत्वमनुनूयतेमयाए
वमेवनगवन्नवगत्यात्मकस्यप्रत्यक्प्रकाशस्यकूटस्यनित्यताऽद्वैतनावश्चमयानु
नूयतइत्यहाहारः।कूटस्यनित्यतायांद्वैतनैरंतर्यनावादिति।उत्पत्त्यादिसाक्षि
एउत्पत्त्यादिविकारसांतरायत्वासंनवादित्यर्थः।अद्वैतनावेहेतुमाहसर्वप्रत्ययेति
।।व्यावर्त्तमानेनुप्रत्ययेघव्यावृत्तेरित्यर्थः।ननुकुसुमेषुसूत्रवदव्यावृत्तावप्यवगत्य
त्मनोनोद्वैतत्वसिद्धिःप्रत्ययानांकुसुमवदवस्थितत्वादित्याशंक्याहावगतिव्यावृत्तानां।
मज्ञातसत्वेमानानावोन्मेषमित्यनिप्रेत्याहप्रत्ययनेदास्त्विति।विमताजाग्रत्प्रत्ययाःपरमा

र्थतोनविद्यंतेचेतन्यप्रकाशव्यतिरिक्तत्वाद्यएवंतएवंयथास्वाप्नप्रत्ययास्तथाचे
मेतस्मात्रयेतिसमुदायार्थःद्वैतस्यमिथ्यात्वेतस्यदृश्यत्वंव्यतिरिक्तंचकारणमुक्तं
तेचैतन्यस्वरूपेआत्मनिनास्तीत्यात्मनःसत्यत्वंकूटस्थनित्यत्वंचसिद्धमित्याहतस्मा
च्चावगतेरिति।योवगंतासएवात्मेतिस्थितेरवगंतुरवगम्यमानत्वान्नावादवगम्यस्य
चानात्मत्वादात्मास्वतःपरतोवानोपादेयोनहेयश्चात्मस्वरूपंहित्वत्प्रसा
दादिदानीमस्मीतिशिष्यः।एवंशिष्येणोक्तंगुरुरनुजानातितथैवेति।प्रकरणेनप्रकृते
दृष्टंविद्याविद्यास्वरूपंतन्निमित्तंसप्रपंचमुपपादितमुपसंहरतिएषाविद्येत्यादिना।
यन्निमित्तः संसारोजाग्रत्स्वप्नलक्षणःएषाऽविद्येत्यन्वयः।।विद्यावेदांतमहावाक्यज
न्यप्रत्ययानिवृत्तकूटस्थात्मप्रकाशरूपेत्यर्थः।एषाचविद्यातवेदानींसंवृत्तेतिकृ
तकृत्यस्त्वमितिशिष्यंप्रत्याहगुरुरित्येवमिति।।गुरुणोक्तंशिष्योपनुनन्द[illegible]मिगीति

॥इतिशब्दःप्रकरणसमाप्तिद्योतनार्थः॥इतिकूटस्थाद्वयात्मबोधनामकंप्रकरणंवि
दृतं॥छ॥यथोक्तविद्यावतःस्तुतस्त्वत्वान्नकिंचिद्विधितोनुष्ठेयमस्तीत्युपपादितंत
त्रयद्येवंविज्ञानवतामपिकेषांचिद्भेददर्शनवासनाव शान्निर्वर्तिस्यप्रदीपावन्निश्चल
विज्ञानंननवतितदातेषांज्ञानदार्ढ्यायपरिसंख्यानंनामवक्ष्माणमनुचिंतनमनुष्ठेय
मुपदेष्टुमारभतेमुमुक्षणामित्यादिनामुमुक्षणंपरममुपशममिच्छतामित्यर्थः।अ
विद्यामूलकत्वाकर्मणांतन्निवृत्तिमंतरेणतंतिकनिवृत्यसंभवात्सर्वोपाङ्गिकमेछि
दंश्रवकर्मानुपजनन्यायविद्यानिवृत्तेरेवोपपन्नतश्चसविद्यानिवृत्तिद्वारातदुभयमि
च्छतामित्युत्तरविशेषणद्वयस्यार्थः।परिसंख्यानानुष्ठानप्रयोजनमाहाविद्याहेतवश्च
ति।अविद्याहेतुर्निर्दिष्टंयेषांतेतथोक्तारागद्वेषादयः।तेचरागादीनांव्यापारोत्पत्ति
हेतवस्तद्व्यापाराश्चद्विविधंकर्मजातंशास्त्रीयंस्वाभाविकंचदेवतिर्यङ्मनुष्यत्वप्रापक

मुपचीयतेइतियतोतस्तन्नाशार्थमविद्यारागादिनिबंधनकर्मतत्फलासंगनिवृत्यर्थंप
रिसंख्यानंकार्यमित्यर्थः।परिसंख्यानप्रकारंस्वोपस्करंनिरूपयतितत्रेत्यादिनातत्रप्र
थममात्मानमनात्मस्वविविच्यानुसंदधीतेसुपदिशंस्तद्विवेकप्रकारमाहशब्दस्पर्श
त्यादिना।विषयत्वेहेतुःश्रोत्रादिग्राह्यत्वादिति।स्वात्मनिशब्दादिस्वरूपपरेषुवाघटा
दिषुविज्ञानाभावोविज्ञाहत्वाभावस्तेतन्मात्रोवोवानिश्चितोयथालोष्टादीनांविषयाणां
तथातेषामेवशब्दादीनांनूतसूक्ष्माणांपरिणतानांदेहाद्याकारतामापन्नानांयथो
क्तविज्ञानाभावोनिश्चीयतइतियोजना।विमतादेहादयोनचेतनावंतोविज्ञानकर्मत्वा
द्घटोष्टादिवदित्यर्थः।हेतुंसिद्धिंपरिहरतिश्रोत्रादीति।ज्ञायंतेदेहाद्याकारपरिणताःश्रो
त्रादयइतिशेषः।एवंदेहेंद्रियमनोबुद्धिप्राणाहंकारपर्यंतस्यसाक्षस्यानात्मतयाहेयत्व
मुपदिश्यावशिष्टमेहयमनुपादेयंचसाक्षिणमात्मानंदर्शयतियेनचेति।अतज्ज्ञाती

योनृतसंघातविलक्षणस्वभावस्तत्पदार्थः। विलक्षणस्वभावत्वमेव प्रकटयन्विषयस्व
भावमुपन्यस्यति तेहीत्यादिना। जन्मग्रहणादेवतदनंतरास्तित्वं गृहीतं द्रष्टव्यं। जन्माद्ययः
षड्भावानांस्वरूपनिबंधनादिविकाराःसंयोगवियोगौपुत्राद्यनुबंधनिबंधनौ। अ
विनाविनिरोनावश्चाशावांगंडुकप्रकाशविषयतयाजडत्वघातको। दर्शनादर्शनश्रा
विनाशादिशब्दार्थः। विकारविकारीतिव्रणगंडुविस्फोटकाद्यवस्थाच्यतेक्षेत्रबीजे।
तिस्त्रीडुपक्वसात्मकपरिणामनेदउक्तः। आदिपदादुत्क्लेदावांतरनेदग्रहः। एवंवि।
धानेकधर्मवंतमित्यर्थः। सामान्येनेतिशब्दाद्यनुनवेसतिसुखदुःखमोहरागाद्युत्पत्तिः
प्रसिद्धेत्यर्थः। कर्मशब्दः कार्यवचनः। शब्दादिविषयतदवस्थासाक्षिणस्तद्विलक्षण
स्वभावत्वमाहतद्विज्ञात्वादेवेति। एवंसाक्षिसाक्षात्क्रियव्यतिरेकात्सोमात्मानात्मानौ ५४
विविच्यात्मानमेवशुद्धमहंब्रह्मास्मीत्यनवरतमनुचिंतयतोपदान्यप्रयुक्तशब्दाद्यु

पलंननिमित्तविशेषउपस्थितोनवतितदाकृतौनेद्युर्यादिविकारोद्रवनयपरि
णामानुचिंतनीयमुपदिशतितत्रशब्दादिनिरिति। उक्तमेवविषयंविनश्यत्युत्पद्य
तिशब्दस्थितिः। ध्वनिरव्यक्तवर्णविशेषोनादमात्रमित्यर्थः। विशेषधर्मैरित्यस्यव्या
पड्भावादिनिरित्यादियावद्वक्तव्यमित्यस्यविवरणार्थंनिर्विशेषणसंसर्गिणि
त्यादीनि। उत्सृतइतीत्यत्रपरिसंचरतीतिशेषः। किंचयएवंसतः प्राक्तनोग्रंथः स्प
ष्टार्थः एवंनावबुद्धस्वरूपस्वरूपसंबंधेः सामान्यविशेषरूपेर्नहानिर्दृष्टिर्वमिमेतितेर
ननिनवमनुचिंतनीयमनिधीयतेनीशब्दाद्यनुनवमनुचिंतनीयंदर्शयतिकिंचय
एवेति। यएवशरीरेंद्रियाकारैः परिणम्यसंस्थितास्तएवांतःकरणंचयतद्विषयसु
खदुःखाद्यात्मनाचपरिणमंतइत्यध्याहारः। तत्रहेतुंचयमाहान्योन्यति। सर्वत्रि
यासुसंहतत्वाच्छंनृत्यकारित्वादित्यर्थः। ततःकिमित्यतआहतेत्रवंसतीति। नृतनोति

कानामेवमक्रियेच्छामतिर्विदुषोममसर्वविकारविकारसंघातसाक्षिणोनिर्विकारस्यनकश्चिच्छब्दादिर्विद्यतेऽतिचिंतयेत्।यदिकश्चित्मिथ्याज्ञाननिमित्राद्दृश्यमानान्ममप्रियमप्रियंवाक्रियाफललक्षणंप्रयुंक्षेतप्रयोक्तुमिच्छेत्तन्मृषैवप्रयुंक्षेतितस्माविषयत्वात्प्रियाद्यगोचरत्वान्ममेतिचिंतयेदितियोजना।प्रियाद्यविषयत्वेमानमाहअत्रश्लोकोयमिति।अविकारित्वंचात्मनश्चिंतयेदितिप्रमाणमाहतथामंविधामिति।नन्वेवमनाधेयातिशयश्चेदात्माकथंतर्हितमुपदिश्यतेऽत्रेपानुपकाराद्यर्थाप्रवृत्तिस्तत्राहयापीति।शरीरसंस्थानमेवतेपश्यंतिनात्मानंशरीरंचसमानिमानानावादात्मनश्चासंगादिलक्षणत्वान्ममयितकृतोतिशयःकिंतुतेषामेवयथाक्रियंफलंनात्मेत्यर्थःस्वस्मानाधेयातिशयत्वेप्रमाणमाहनेनमित्यादिना।किंचयद्यनात्मानामसात्रद्वातत्कृतंप्रियमप्रियंवानवेन्नतन्ममास्तिसर्वात्मत्वान्म

मतिर्चिंतयेदित्याहानात्मवस्तुनश्चेति।कुतस्तत्सामत्वमित्यत्रहेतुमाहात्मनश्चेति।आत्मनश्चाद्यत्वेप्रामाणिकेसतितद्विरुद्धमद्वयस्यासत्यादित्यर्थः॥उक्तार्थसाधकंप्रमाणमप्यनुशीलनीयमित्याहयानीति॥ब्रह्मविद्याप्रतिपादकानिसर्वाणिवेदांतवाक्यानिविस्तरश्चोबकुशाखेपसंहारेणपुनःपुनरालोचयितव्यानीत्यर्थः।द्विरुक्तिर्ग्रंथसमाप्तिद्योतनार्था॥उपदेशसहस्राःसफलबंधोयथामति॥व्याख्यातोरामतीर्थेननक्त्यास्वज्ञानसिद्धये॥ब॥॥ब॥ब॥ब॥ब॥ब॥ब॥ब॥ब॥ब॥ब॥

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

गद्यबंधटीका